कर्णामृत	Karṇāmṛta
and	and
अन्यानि सुभाषितानि	other Subhāṣitas
No. 52	147. 1902-07.

Size.— $5\frac{1}{5}$ in. by 8 in.

Extent.— 46 leaves ; 26 lines to a page ; 20 letters to a line.
18-22 ,, ,, ,, ,, 15 ,, ,, ,, ,,

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing beautiful, clear and legible but not uniform; 1st part i. e. folios 1–6 have a yellowish appearance; slightly moth-eaten folio No. 40 blank.

The Ms. divided as follows—

folios 1–6 1st Śataka— 1st part

,, 1–23 2nd and 3rd Śatakas } 2nd part.
,, 24–39 other Subhāṣitas }

The Ms. contains several subhāṣitas taken from other works besides कर्णामृत. The arrangement of the śatakas is 1st, 3rd and 2nd.

Age.— The Ms. appears to be old.

Author of Karṇāmṛta.— Lilāśuka, also called Bilvamaṅgala.

Begins.— fol. 1[b]

श्रीगजाननो जयति ॥

चिंतामणिर्जयति etc. as in No. 51

folio 6[b] इति श्रीलीलाशुककृते लीलामृते प्रथमशतकं समाप्तं ॥ छ ॥ छ॥

folio 12[a] of the 3rd शतक

इति श्रीलीलाशुकविरचिते कर्णामृते तृतीयशतकं समाप्तं ॥

कर्णामृत Ends.— fol. 24[a]

कालिंदीबहुलप्रवाहरभसं संस्तंभयन् तत्क्षणा-
च्छैलान्विद्रवयन्मृगान्विवशयन् गोवृंदमानंदयन ॥
गोपान्संभ्रमयन् मुनीन्मुकुलयन् सप्तस्वरान् जृंभय-
न्लोकानर्थमुदीरयन्विजयते वंशी निनादः शिशोः ॥ १० ॥
इति श्रीलीलाशुकविरचिते कर्णामृते द्वितीयशतकं समाप्तं छ छ

Then follow some Subhāṣitās—

folio 24[a] केचित शार्ङ्गधरीयाः श्लोकाः लिख्यते अथ नमस्कृतिः
चलत्कर्णानिलोद्धूतसिंदूरारुणितांबरः ॥
जयत्यकाले विसृजत्संध्यामिव गजाननः ॥ १॥
अविरलविगलन्मदजलकपोलपालीनिलीनमधुपकुलः ॥
उद्भिन्ननवदमश्रुश्रेणिरिव गणाधिपो जयति ॥ २ ॥ etc.

Subhāṣitās end on folio 39ᵇ

संधिगुप्तं नममागोरसाभिज्ञं चेतः कस्मात्प्रकुप्यसि ॥
अस्थानरुदितैरेभिरलमालोहिते क्षणे ॥ ५ ॥
अथ बिंदुमति त्रिनयनचूडारलंसिंधोकुमुद्वती दयितः ॥
अयमुदयति घुसृणारुणरमणीवदनोपमश्चंद्रः ॥ ६ ॥
डिठठठ etc.

References.—For कृष्णकर्णामृत See No. 51

कृष्णकर्णामृत Kṛṣṇakarṇāmṛta*

No. 53 477. 1891–95.

Size.— 10¾ in by 4¼ in.

Extent.— 7 leaves ; 10 lines to a page ; 42 letters to a line.

Description.— Country paper ; *Bengālī* characters ; old in appearance ; hand-writing small but clear, legible and uniform ; yellow pigment used for corrections ; borders in double (sometimes triple) black lines ; fol. 7 missing.

Age.— Appears to be fairly old.

Author.— Līlāśuka.

Begins.—fol. 1ᵇ

श्रीराधाकृष्णौ जयतः ॥
चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिच्छमौलिः ॥
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥१ ॥
अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं
वस्तु प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम् ।

---

*A Ms. (No. 478/1891–95) of this work which contains a Bengālī version is transferred to the Vernacular section.

स्रस्तस्रस्तनिरुद्धनीविविगलद्गोपीसहस्रावृतं
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति ॥ २ ॥
आलिंग्य राधां व्रजसुभ्रुवाङ्गना-
दृङ्नृपा तया गूढविलासलोभतः ।
कुञ्जे रसास्वादविशेषलब्धये
प्रारम्भि रासो रसिकेन्द्रमौलिना ॥ ३ ॥

Ends.— fol. 8[a]

ईशानदेवचरणाभरणेन नीवी
दामोदरस्थिरयशस्तबकोद्भवेन ॥
लीलाशुकेन रचितं तव कृष्णदेव
कर्णामृतं वहतु कल्पशतान्तरेऽपि ॥ ११ ॥
धन्यानां सरसानुलापलहरी सौरभ्यमभ्यस्यतां
कर्णानां विवरेषु कामपि सुधावृष्टिं मुहानं मुहुः ।
वन्यानां सुदृशां मनोनयनोर्भग्नस्य देवस्य नः
कर्णानां वचसां विजृम्भितमहो कृष्णस्य कर्णामृतम् ॥ ११२ ॥
अनुग्रहद्विगुणविशाललोचनै-
रनुस्मरन्मृदुमुरलीरवामृतैः ।
यतो यतः प्रसरति मे विलोचनः
ततस्ततः स्फुरतु तवैव वैभवम् ॥ ११३ ॥
॥ इति श्रीकृष्णकर्णामृतं ॥

References:— See No. 51

कृष्णकर्णामृत — Kṛṣṇakarṇāmṛta

No. 54 — 566. Viśrāma (i)

Size.— 6 in. by 4 in.

Extent.— 26 leaves; 7 lines to a page; 22 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī characters; white in appearance; hand-writing clear, legible and uniform; borders of some folios ruled in double red lines; the Ms contains the 1st śataka.

Begins.—fol. 1[a]

॥ श्रीगणाधिपतये नमः ॥ शुभमस्तु

चिंतामणिर्जयति etc. as in No. 56 below

Ends.—fol. 25[b]

धन्याना etc. up to स्फुरतु तवैव वैभवं ॥ ११२ ॥

followed by इति श्रीलीलाशुकविरचिते कर्णामृते प्रथमशतकं समाप्तं श्रीकृष्णार्पणमस्तु । शके

References— See No. 51

कृष्णकर्णामृत Kṛṣṇakarṇāmṛta

No. 55 $\frac{627.}{1883\text{-}84.}$

Size.— $12\frac{1}{5}$ in. by $4\frac{1}{6}$ in.

Extent.— 9 leaves; 18-19 lines to a page; 48-52 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī characters; hand-writing very closely and carelessly written; some folios have become dirty probably by oil spots; borders ruled in double black lines.

The present Ms. and the Ms. No. $\frac{628}{1883\text{-}84}$ appear to have been written by the same scribe. The name of the scribe is Dinanātha as given in the present Ms.

Age.— A modern copy.

Author.— Līlāśuka.

Begins.— fol 1[a]

श्रीगुरुगणपति इष्टदेवताभ्यो नमः ॥

चिंतामणिर्जयति etc. as in No. 56 below.

Ends.— fol. 9[b]

जयतु न २ देवो देवकीनंदनो सौ ज. २ कृष्णो वृष्णिवंशप्रदीपः ॥ ज.२ मेघः श्यामलः कोमलांगो ज. २ पृथ्वीभारं नाशौ मुकुंदः ॥ ११२ ॥

इति लीलाशुकविरचिते श्रीकृष्णकरुणा(र्णा)मृते तृतीयोल्लासः समाप्तः ॥ दीननाथेन लिखितमिदं स्वार्थपरार्थं च ॥ लेखकपाठकयोः शमस्तु ॥ छ ॥

References.— See No. 51

कृष्णकर्णामृत — Kṛṣṇakarṇāmṛta

No. 56 — 628. 1883-84.

Size.— 12 in. by $4\frac{1}{6}$ in.

Extent.— 12 leaves; 18–19 lines to a page; 48 letters to a line.

Description.— Modern paper with water-marks; Devanāgari characters; hand-writing small and legible but very closely written; text bounded on either sides by double black lines; red pigment scarcely used; complete.

Age.— A modern copy.

Author.— Līlāśuka or Bilvamaṅgala.

Begins.— fol. 1[a]

श्रीगणेशाय नमः ॥

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिच्छमौलिः ॥
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥ १ ॥

Ends.— fol. 9[a]

धन्यानां सरसानुलापसरणे सौरभ्यमभ्यस्यतां
कर्णानां विवरे तु कामपि सुधावृष्टिं दुहानं मुहुः ॥
धन्यानां पिबतां मनोनयनयोर्मग्नस्य देवस्य नः
कर्णानां वचसां विजृंभितमहो कृष्णं स्वकर्णामृतम् ॥ १०७ ॥
अनुग्रहाद्विगुण विशाललोचनैरुत्स्मितं मृदुमुरलीरवामृतैः ॥
यतस्ततः प्रसरति मे विलोचने तेन तत्स्फुरतु तवैव वैभवं ॥ १०८ ॥

इति लीलाशुकविरचितं कर्णामृतस्य तृतीयशतकं समाप्तम् ॥ श्रीगोपाळकृष्णार्पणमस्तु ॥ छ ॥ लेखकपाठकयोः शमस्तु ॥ छ ॥

Then follow a number of verses which narrate the duties of a Brahmin.

प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिनै ॥ २ ॥
तदहं संप्रवक्ष्यामि द्विजानामुपकारकः ॥ etc.

References.— See No. 51

कृष्णकर्णामृत Kṛṣṇakarṇāmṛta

No. 57 334. 1892-95.

Size.— $7\frac{1}{4}$ in. by $4\frac{1}{6}$ in.

Extent.— 15 leaves; 8-9 lines to a page; 25 letters to a line.

Description.— Country paper; Devanāgari characters; old in appearance; hand-writing legible but carelessly written; borders ruled in double black lines; contains only the 1st śataka (?)

Age.— Saṁvat 1766

Author.— Līlāśuka.

Begins— fol. 1[b]

श्रीकृष्णाय नमः ॥
चिंतामणिर्ज्जयति etc. as in No. 56

Ends.— fol. 15[a]

धन्यानां etc. up to स्फुरतु तवैव वैभवः ॥ १२ ॥

followed by इति श्रीबिल्वमंगलविरचितं श्रीकृष्णकर्णामृतं स्तोत्रं संपूर्णं ॥ शुभमस्तु ॥ संवत् १७६६ ॥

References.— See No. 51

कर्णामृत ? Karṇāmṛta

No. 58 491. 1887-91.

Size.— 9⅕ in. by 4¼ in.

Extent.-- 14 leaves; 14-15 lines to a page; 32 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing small but clear and legible; borders of folios 1-9 ruled in double black lines and borders of folios 10-14 not ruled; folios 13 and 14 slightly damaged.

The Ms. is incomplete and contains 149 stanzas. It is doubtful whether this कर्णामृत is the same as that of Līlāśuka.

Age.-- The Ms. appears to be old.

Author.— Līlāśuka or Bilvamaṅgala ?

Begins.— fol. 1[b]

॥ श्रीमद्विघ्नवल्लीविध्वंसकगणेशाय नमः ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥
इंदीवरदलशामाय नमः ॥

स्वभक्तरक्षैकपरं कृपालुं यदोः कुलांभोधिसुधामयूखं ॥
श्रीकृष्णमानम्य करोमि काव्यं कर्णामृतं पुण्यकथाविलासं ॥ १ ॥

लीलाजनोस्तस्य महामहामहस्वीयशस्वकीर्त्यामलकीर्त्ति(र्त्ति)रासीत ॥
पौत्रौ निरुद्ध स्वशरीरशोभा निरुद्धकामाखिल विक्रमः सः ॥ २ ॥ etc

Ends.— fol. 14[a]

सखि कस्य कृते विषयते विषदं ब्रूहि तमानयेद्भुतं ।
अपि नाकरसारसातलेष्विति सागयत चित्रलेखया ॥ ४८ ॥
तमुषा न शशाक भाषितुं त्रपिता च स्मरजर्जरीकृता ।
नयनांगुलिपल्लवेंगितैर्भृशमालेखितुमाह भूभुजः ॥ ४९ ॥
अथ चंद्रकलाधिकंदिरे कमनीये शमनीयमंदिरे । अधिभित्तिलिलेखयो

कर्णामृत
with
श्रवणाह्लादिनी टीका

Karṇāmṛta
with
Śravaṇālhādini ṭikā

No. 59

178.
1879--80.

Size.-- $5\frac{2}{5}$ in. by $9\frac{3}{5}$ in.

Extent.— 145 leaves; 22-24 lines to a page; 15 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing bold, clear and legible; पृष्टमात्रास used; borders ruled in two double black lines; red pigment used for folio-numbers; appears to be a part of some big manuscript since it contains folio-numbers 598-741 at the top of the folios besides the usual numbers 1, 2, 3 etc. below.

The Ms. is divided into two parts; folios 1-10[a] contain the text of कर्णामृत and folios 10[b]-145 contain the commentary along with the text.

Age.— The Ms. appears to be old.

Author (of the text).— Līlāśuka or Bilvamaṅgala.

,, ,, ,, comm.)— Gopālabhaṭṭa.

Begins.— fol. 1[b]

॥ श्रीकृष्ण ॥

(text) चिंतामणिर्जयति etc. ..... as in No. 51

folio 10[a] इति श्रीविल्वमंगललीलाशुकविरचितं श्रीकृष्णकर्णामृतं संपूर्णं ॥ शुभं भवतु

Begins. (comm.)— fol. 10[b]

श्रीगोपीजनवल्लभाय नमः ॥

श्रीगोपीजनवल्लभस्य चरणांभोजं भजे रंजितं ।
गोपीनां कुचकुंकुमेन विलसन्माणिक्यमंजीरकं ।
वृंदारण्य-निकुंजपुंजसरणी गत्येकलब्धव्रतं ॥
कालिंदीतटरासलास्यललितप्रोद्दंडनृत्यप्रियं ॥ १ ॥

यत्पादवारिजरजःकणिकैकबंधुर्मूकोपि शास्त्रविदुषां पदवीं प्रयाति ।
अस्मद्विधैकशरणं करुणाकरं तं नारायणं गुरुमहं सततं नमामि ॥ २ ॥ etc.

Ends.— fol. 144[b]

इति श्रीलीलाशुकाविल्वमंगलविरचितं श्रीकृष्णकर्णामृतंस्तोत्रं ॥

श्रीगोविंदपदारविंदभजनत्यक्ताखिलार्थाव्यहः
श्रीमद्भागवतार्थविभ्रमभवद्वंदन्युणा विश्रुतः ।
श्रीराधारमणांघ्रिसक्तमनसा गोपालभट्टेन तत् ।
पुत्रेण श्रवणामृतस्य रचिता टीकास्तु सत्प्रीतये ॥ १ ॥
श्रीगोपीजनवल्लभत्वदपरंजनैन कंचित्प्रभो
तस्मात्त्वां प्रणिधानपूर्वकमिमां याञ्च(ञ्चां)मदीयां शृणु ।
राधादि व्रजसुंदरीगणमनः क्षीराब्धिचंद्रोदय-
श्रीकर्णामृतटीकया त्वमनया प्रीतोस्तु नःसर्वदा ॥ २ ॥
कर्णामृतं बुधावर्थ रत्नानि कतिचिन्मया ॥
लब्धानि तत्र चान्यानि किं नु संति सहस्रशः ॥ ३ ॥
तैरर्थरत्नैर्विनमालिदासमित्रस्य कर्णद्वयमात्मनश्च ।
विभूषयामीह तथैव लक्ष्मीनारायणस्यप्यनुजस्य कंठं च ॥ ४ ॥
इति श्रीभगवज्जनचरणराजीवरजःकणिकशरणगोपालभट्टविरचिता
श्रवणाह्लादिनी कर्णामृतटीका समाप्ताः ॥ छ ॥

References.— 1 Aufrecht's Catalogus Catalogorum— i, p. 119[a] Aufrecht mentions the name of the comm. by Gopāla as कृष्णवल्लभा iii, p. 27[b]

The legend as given by Aufrecht and also by Mr. Sheshagiri Shastri, is to be found in the commentry of Gopālabhaṭṭa with a little variation.

(कृष्ण)कर्णामृत
with
टीका प्रपा

(Kṛṣṇa)karṇāmṛta
with
Commentary Prapā

No. 60

257.
Viśrāma(i)

Size.— 12¼ in. by 4⅕ in.

Extent.— 62+2=64 leaves ; 7 lines to a page ; 44 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing clear and legible ; borders ruled in double red lines ; red pigment used for marking the stanzas of the text ; yellow pigment used for corrections ; two शोधपत्रs to be seen in the Ms. ; the cover-folios decorated with designs.

The Ms. contains the 2nd śataka only. 2nd stanza of the introduction of the comm. states its author to be शंकर ; while the last colophon states that the comm. was composed by Kṛṣṇapaṇḍita at the instance of श्रीशंकर.

Age.— A new copy.

Author (of the text).— Līlāśuka.

,, (,, ,, comm.)— Śaṅkara.

Begins— fol. 1ᵃ

(text) अभिनवनवनीतस्निग्धमापीतदुग्धं दधिकणपरिदिग्धं मुग्धमंगं मुरारेः ॥
दिशतु भुवनकुट्टच्छेदितापिंछगुच्छच्छविनरशिशिपिंछा लांछितं वांछितं नः१

(comm.) श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ ॥ शुभमस्तु ॥
जयति जलदनीलोविटुलः श्लिष्टगात्रः सलिलनिधिदुहित्रा विद्युदुल्लासकांत्या ॥
कनकहरिमणिभ्यां संधितं चारूनिष्कं इति सकलमुनींद्रै धार्यते यो हृदब्जे ॥१॥
श्रीशंकरेण निरूपाधितया वितीर्णां टीका प्रपां सुललितां सरलोक्तिधारां ॥
सम्यक्प्रविश्य विबुधा हरिभक्तपांथा कर्णामृतानि सरसान्मुहुरापिबंतु ॥२॥

अभिनव इति । अभिनवं च तत् नवनीतं च हव्यंगवीनं तेन स्निग्धं श्लेक्ष्ण नवनीतलिप्तांगमित्यर्थः दधनः कणैः बिंदुभिः परिदिग्धं लिप्तं चित्रितमिति यावत् ॥ अत एव मुग्धं सुंदरं तापिंछस्य तमालवृक्षस्य गुच्छस्तबकः

तस्य छविरिव कांतिरिव कांतिर्यस्य तत् अन्यधर्मस्य कांतेरन्यत्रासंभवात् उपमायां पर्यवसानान्निदर्शनालंकारः etc .....

Ends.— fol. 61[b]

(text) यस्यात्मभूतस्य गुरोः प्रसादादहं विमुक्तोस्मि शरीरबंधात् ॥
सर्वोपदेष्टुः पुरुषोत्तमस्य तस्यांघ्रिपद्मं प्रणतोस्मि नित्यं ॥ १०९ ॥

(comm) शतकसमाप्तौ तमेव गुरुत्वेन प्रणमति । यस्येति । आत्मभूतस्य ब्रह्मणः रूपस्य कृष्णस्य गुरोः प्रसादात् तत्वमस्यादि तत्वोपदेशरूपप्रसादात् अहं शरीरमेव चतुर्विंशतितत्वरूपं सप्तदशकलात्मना बंधः तस्मात् विमुक्तः जातोस्मि शरीरसत्वेपि दग्धपटन्यायवत् अवस्थितशरीरत्वात् वर्तमानसाम्यकल्पितसाम्येस्मीति प्रयोगः । देहस्य चरमत्वात्सर्वोपदेष्टुः जीवमात्रस्य गुरोः पुरुषेषु उत्तमस्य श्रेष्टस्य सर्वज्ञत्वेनाधिकस्य एतेन कपिलोक्तानीश्वरवादो दूरीकृतः ॥ पुरुषाख्यपंचविंशतितत्वविशेषः । ईश्वरः सर्वज्ञः अन्यो सर्वज्ञ इति परमेश्वरस्य बालकृष्णादि लीलाविग्रहस्य अंघ्रिपद्मं नित्यं प्रप्रणतोस्मि ॥ अत एव विमुक्त इति भावः विमुच्यते नमस्तस्मै जन्मसंसारबंधनात् दिति प्रमाणात् ॥ १०८ ॥

इति शंकरप्रेरितकृष्णपंडितकृतायां कर्णामृतव्याख्यायां दशोत्तरं द्वितीयं शतकं संपूर्णमस्तु ॥ श्रीकृष्णार्पणमस्तु ॥

References.— See No 61 below.

कृष्णकर्णामृतव्याख्या	Kṛṣṇakarṇāmṛtavyākhyā
called	called
प्रपा	Prapā
No. 61	465. 1891–95.

Size.— $8\frac{2}{5}$ in. by 4 in.

Extent.— 34 leaves ; 11–12 lines to a page ; 36 letters to a line.

Description.— Country paper ; white in appearance ; Devanāgarī characters ; hand-writing clear and legible but not uniform.

The Ms. contains only the 2nd śataka up to 101 stanzas.

Age.— The Ms. is not very old.

Author.— Śaṁkara.

Begins.— fol. 1[a]

॥ श्रीगणेशाय नमः ॥

जयति जगतिनीलोविष्टुलः श्लिष्टगात्र
सलिलानिधिदुहित्रा विद्युदुल्लासकांत्या ।
कनकहरिमणिभ्यां संधितं चारुनिष्कं
इति सकलमुनींद्रैर्ध्यायते यो हृदाब्जे । १ ॥
श्रीशंकरेण निरुपाधितया वितीर्णो
टीकां प्रपां सुललितां सरलोक्तिधीरां ।
सम्यक् प्रविश्य विबुधाः हरिभक्तिपांथाः
कर्णामृतानि सरसानि मुहुरापिबंतु ॥ २ ॥

अभिनवेति० १ etc.... ...

Ends.— fol. 34[b]

चित्स्वरूपस्य लीलाविग्रहः संसारीमुक्तिदायक इति यावत् रंगे धनुरुत्सवे अवतारो यस्य सः दृष्टः अप्रविष्टः इत्यर्थः अमरगणानां देवसमुदायानां आनंदकृतकंसवधरूपेष्टप्राप्त्या तोषकरः हरि युग्मान् भक्तान् पातु अत्र अनैकैर्गृहीतृभिः अनेकप्रकारैः शैलत्वादिभिः एक एव गृहीतो ज्ञात इति वर्णनात् उल्लेखालंकार उल्लेखनमनेकधा गृहीत भेदादिकस्य उल्लेखः सतां मत इति विधानाय स्रग्धरावृत्तं १०१

References.— Aufrecht iii, 26[b]

कृष्णकर्णामृत Kṛṣṇakarṇāmṛta
with **टीका** with Commentary
कर्णानंदप्रकाशिनी Karṇānandaprakāśinī

No. 62 133. 1882-83.

Size.— 9½ in. by 4½ in.

Extent.— 72 leaves ; 9 lines to a page ; 28 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing clear, legible and uniform; borders ruled in double black lines; red pigment used; incomplete; folios 3, 32-35, 64 and 65 missing.

The Ms breaks at the 155th verse.

Age.— Appears to be old.

Author.— Not mentioned.

Begins.— fol. 1[b]

(text) स्फुरद्वदनपंकजः कनककुटदेहद्युतिः
प्रशस्तसुखसंपदां निधिरपूर्वमानप्रदः ।
स कृष्णवृषभानुजाचरणमाधुरी चंचुरः
सदा मधुरवाक्पदुर्जयति साधु वैयासकिः ॥ १ ॥

(comm) ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥
यच्छ्रद्धालवलंबितं हृदयं जानाति तत्वमक्लिष्टं ।
तस्य हरेः पदकमलं वंदे तारोदराब्धिरत्नस्य ॥ १ ॥
फलिताक्षरसंभासा कृष्णकीर्त्तिविधुश्रिता ।
बोधचक्षुः प्रसादस्य हेतुरेषार्थकौमुदी ॥ २ ॥
मिताक्षरार्थगंभीरा धीरांतर्मोददायिनी ।
व्याकृतिस्तन्यते श्रीमत्कर्णानंदप्रकाशिनी ॥ ३ ॥

Ends— fol. 79[b]

(text) मृदुलहसितं प्रेंखच्चिल्लिप्रनृत्तविलोचनं
सरसमुरुलीरंध्रासक्तारुणाधरपल्लवं ।
कुटिलविकुरैर्भ्राजद्गंडस्फुरन्मणिकुंडलं
द्युतिसमधिकं राधा जानेर्मुखं मम लोभनं ॥ ११५ ॥

comm..... राधाजानेर्मुखं मम लोभनं लोभजनकं तद्रष्टुं लोलुपोहमित्यर्थः । कीदृशं। मृदुलहसितं मंदहास्ययुक्तं । पुनः कीदृशं । प्रेंखच्चिल्लिप्रेंखंती आंदोलमा.....

References.— This is the only Ms. of कृष्णकर्णामृत with the comm. कर्णानंदप्रकाशिनी.

कर्णामृत
with टीका
सुवर्णचषक

Karṇāmṛta
with Commentary
Suvarṇacaṣaka

No. 63

241.
1880-81.

Size.— $10\frac{4}{5}$ in. by 5 in. and $10\frac{1}{4}$ in. by $4\frac{1}{2}$ in.

Extent.— 163 leaves; 10-11 lines to a page; 32 letters to a line.

Description.— Country paper; also modern paper with watermarks used for folios 13-50 of the first śataka; hand-writing bold, clear and legible but not uniform; separate pagination for every śataka; borders of the folios of the 2nd śataka ruled in double red lines.

Age.— The Ms. does not appear to be very old.

Author (of the text).— Līlāśuka.

,, (,, ,, comm.)— Pāpayallayasūri, son of तिरुमल्ल and कोंडमांबा.

Begins.— fol. 2[a]

(text) चिंतामणिर्जयति etc. as in No. 51.

(comm.) fol. 1[a] श्रीगणेशाय नमः ॥

श्रीरामं सीतयायुक्तं मुकुंदमौनिशेखरं ।
यज्वानं वाजपेयेन यज्ञेशं प्रणतोस्म्यहं ॥ १ ॥
येषां संदर्शनेनैव षट्शास्त्रवशगो भवेत् ॥
यतींद्रान्वासुदेवेन्द्रान्नमामोभीष्टसिद्धये ॥ २ ॥
वसुमत्यन्वये जोंतययकृपसूरिणा ॥
कर्णामृतास्य व्याख्येयं क्रियते कृतिनां मुदे ॥ ३ ॥
मंत्रशास्त्रे महाभाष्ये मणौमीमांसयोस्सदा ॥
मतिर्यस्य भवेत्तेन मंतव्या कृतिरीदृशी ॥ ४ ॥
तथापि पूर्णे क्षीरेण स्वर्णपात्रं करे वहन् ॥
पिबेति क्षीरे दाता मे सहाय इति साहसं ॥ ५ ॥
पंडितभट्टादिभिः प्राप्य यशसे प्रार्थना न मे ॥
किं तु कृष्णस्तुतिर्नित्यं भवत्विति मतिर्मम ॥ ६ ॥ etc.

folio 50[b] इति श्रीपदवाक्यप्रमाणवारावारीणनिरमल्लभट्टोपाध्यायपुत्रेण पापयल्लसूरिणा विरचितायां श्रीकर्णामृतव्याख्यायां सुवर्णचषक-समाख्यायां प्रथमशतकं समाप्तं॥

folio 64[b] of the 2nd शतक

इति श्रीपदवाक्यप्रमाणपारावारपारिणवसुमतितिरुमल्लभट्टचूपाध्याय-पुत्रेण कौंडमांबागर्त्तशुक्तिमुक्तामणिना पापयल्लयसूरिणा विरचितायां कर्णामृतव्याख्यायां द्वितीयोध्यायः ॥ २ ॥

Ends.— fol. 48[b]

(text) या प्रीतिर्विदुरार्पिते मुररिपो कुंत्यर्पिते यादृशी
या गोवर्धनमूर्द्धि या च पृथुके स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते शबरीका दत्ते धरे योषितां
प्रीतिर्मुनिपत्निभक्तिरचितेह्यैत्रापि तां तां कुरु ॥ ६ ॥

(comm.) यशोदार्पितदत्ते स्तन्ये क्षीरे या प्रीतिः ॥ भारद्वाजसमर्पिते रामवनवास वेलायां प्रपां प्रयागे भारद्वाजेन दीयमानफलादावित्यर्थः ॥ य प्रीतिः शबरिका दत्ते मतंगाश्रमे शबरिकाया दीयमानान्न इत्यर्थः ॥ या प्रीतिः ॥ योषितामधरे गोपस्त्रीजनाधरे या प्रीतिः ॥ मुनिपत्निभिः भक्त्या रचिते या प्रीतिः ॥ वृंदावने यज्ञपत्निभिः आनीयमानान्न इत्यर्थः ॥ अत्रापि मम प्रणीतकर्णामृतग्रंथोपि तां तां प्रीतिं वीप्सार्थे द्विर्भावः ॥ कुरु ॥ ६ ॥ इति श्रीपदवाक्यप्रमाणपारावार-पारीण तिरमल्लभट्टोपाध्यायपुत्रेण पापल्लसूरिणा विरचितायां श्रीकर्णामृत-व्याख्यायां सुवर्णचषकसमाख्यायं रमणीयं तृतीयश(त)कं संपूर्णं ॥ ॥ ॥

References.— Aufrecht— i, 119[a]; iii, 26[b].

This work with the comm. of Pāpayallayasūri is described in the I. O. Cat. part. VII Nos. 3904-5.

Mr. Sheshagiri Shastri makes the following remarks about Pāpayallayasūri in his Report of 1893-94 No. 2 p. 58 " *Kṛṣṇakarṇāmṛtavyākhyā* is a commentary on the above (i. e. कृष्णामृत) by Pāpayallayasūri who was born in the family of Paśupāti. He refers to a hermit named Yajñeśa who performed the sacrifice called Vājapeya and also to an ascetic named Mukunda who seems to have been his preceptor.....As the commentator speaks of

Mallinath who flourished in the fourteenth century he must have lived in a later age."

कर्णामृत
with
टीका

Karnamrta
with
Commentary

No. 64

492.
1887-91

Size.— 10 in. by 6$\frac{1}{5}$ in.

Extent.— 34 leaves; 14-15 lines to a page; 30 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing clear and legible but not uniform; borders ruled in double black lines; some folios slightly torn but pasted with paper-slips; 1st folio slightly moth-eaten.

The Ms. contains only the 2nd śataka. The title is mentioned on the 1st and the last folios.

Age.— Śaka 1721.

Author (of the text).— Lilāśuka.

Author (of the comm.)— Annonymous.

Begins.— fol. 1[a]

(text) अभिनवनवनीतस्निग्धमापीतदुग्धं
दधिकणपरिदिग्धं मुग्धमंगं मुरारेः ॥
दिशतु भुवनक्लृप्तच्छेदितापिंच्छगुच्छ-
च्छविनवशिखिपिंच्छा लांछितं वांछितं नः ॥ १ ॥

(comm.) श्रीकृष्णाय नमः ॥ लोकप्रसिद्धकोदंडबाणानूत्यकवैक्षवं धनुः ॥ पुण्यपि .....एवादीन्नमो रामाय गृह्णते ॥ १ ॥ पूर्वशतकांते त्वद्वैभवमेव मदीयं ज्ञानकरणं गोचरयतीत्युक्तं त्वद्वैभवं येन येन प्रकारेण प्रतीतं तेन तेन प्रकारेणाह ॥ अभिनवेत्यादि ॥ अभिनवनवनीतेन नूतननवनीतेन स्निग्धं ॥ आपीतं इषत्पीतवर्णं दुग्धं क्षीरं यस्मिन तत ॥ इषत्पीत ॥ वर्णक्षीरकणैर्व्याप्त-मित्यर्थः ॥ etc.

End.— fol. 34[a]

त्वयि प्रसन्ने मम किं गुणेन त्वय्यप्रसन्ने मम किं गुणेन ॥
रक्ते विरक्ते च वरे वधूनां निरर्थकः कुंकुमपत्रभंगः ॥ ९९ ॥
इति श्रीलीलाशुकेविरचिते कर्णामृते द्वितीयं शतकं ॥ २ ॥

(comm.) हे कृष्ण त्वयि प्रसन्ने सति मयि दयां कुर्वति सति मम गुणेन किं प्रयोजनं न किंचिदपि प्रयोजनमित्यर्थः ॥ त्वयि अप्रसन्ने मयि दयामकुर्वति सति मम गुणेन किं किं प्रयोजनं किमपि प्रयोजनं नास्तीत्यर्थः ॥ तत्र दृष्टांतमाह ॥ रक्त इति ॥ वरे प्रिये रक्ते अनुरागवति सति वधूनां कुंकुमपत्राणां कुंकुमविरचितपत्रावलीनां भंगः सार्थको भवति ॥ तस्मिन्नेव विरक्ते सति विषयेभ्यो विमुखे सत्यपि कुंकुमपत्रभंगो निरर्थकोत्यर्थः ॥ विषयेषु विरक्तस्य अलंकारशतेन प्रवृत्तिरिति भावः ॥ ९९ ॥ इति कर्णामृतद्वितीयशतकटीका समाप्ता ॥ शके १७२१ सिद्धार्थिनामवर्षे आषाढासित चतुर्दश्यां लेखनं समाप्तमिति ज्ञेयं ॥ श्रीकृष्णजयकृष्णजयजयकृष्ण ॥ कृष्णार्पणमस्तु ॥

References.— See No. 51 for text.

कलाविलासकाव्य — Kalāvilāsakāvya

No. 65 — 24. / 1873-74.

Size.— 11½ in. by 5⅓ in.

Extent.— 21 leaves; 13 lines to a page; 38 letters to a line.

Description.— Thin country paper; Devanāgarī characters; handwriting clear, legible and uniform; borders ruled in double red lines and edges in single; red pigment used for verse-numbers and colophons while yellow pigment for corrections; complete.

Age.— Saṁvat 1931.

Author.— Kṣemindra flourished in the 2nd and 3rd quarters of the 4th century (cf. I. O. Cat. No. 3930.)

Subject.— A poem on the art of roguery.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥

अस्ति विशालं कमलालालितपरिश्वंगमंगलायतनं ॥
श्रीपति वक्षःस्थलमिव रलो(जो)ज्वलमुज्वलं नगरं ॥ १ ॥
मणिभूबिंबितमुक्ता प्रलंब निवहेन यत्र शेषाहिः ।
भुवनानि विभर्त्ति सदा बहुधात्मानं विभजैकः ॥ २ ॥

fol. 5[a] इत्याचार्यक्षेमीन्द्रकृते कलाविलासकाव्ये दंभवर्णनं नाम प्रथमः सर्गः ॥ १ ॥ छ ॥

fol. 8[a] इत्याचार्यक्षेमींद्रकृते कलाविलासकाव्ये लोभवर्णनं नाम द्वितीयः सर्गः ॥ २ ॥ छ ॥

Ends.—fol. 20[b]

उक्तेति मूलदेवो विसृज्य शिष्यात्कृतोचिताचारः ॥
किरणकलिक(का)विकासां निनाय निजमंदिरे रजनी ॥ ४१ ॥
केलीमथस्मितविकाशकलाभिरामः
सर्वाशयांतरकलाप्रकटप्रदीपः ॥
लोकोपदेशविषयः सुकथाविचित्रो
भूयात्सतां दयित एष कलाविलासः ॥ ४२ ॥
कलाविलासक्षेमींद्रप्रतिभांभोधिनिर्गतः ॥
शशीवमानसाह्लादं करोतु सततं सतां ॥ ४३ ॥
इत्याचार्य्यक्षेमींद्रकृते कलाविलासकाव्ये सकलनिर्द्धारणं नाम दशमः सर्गः ॥ संपूर्णः समाप्तः ॥ छ ॥

The following portion is written in a different hand:—

अंकितं शंकितपदं कृतं भातं तथांकिते ॥
नोक्तितं बुद्धितो दृष्टेरस्पष्टं क्वापि चेकितं ॥ १ ॥

अस्मिन् ग्रंथे कानिचित्प्रकरणान्युपरितनपुस्तकेरस्पृष्टाक्षराण्यशुद्धानि च तानि शोधने समुज्झितानि ॥

यूरूपामरकेशियाख्यधरणी सिंहासनाधीश्वरी ।
ईशाख्येश्वर कीर्तिमूर्तिरतुलश्रीलंघनाधीश्वरी ॥
राज्येऽस्या विधुरामनंदधरणीसंख्ये शके वैक्रमे ।
ग्रंथोयं लिखितोमरौ मधुसितेष्टम्यां पुरे वैक्रमे ॥
शास्त्रिपन्नालाल बालकृष्णाभ्यां चशोधितम ॥

References.— 1 Mss. Aufrecht's Catalogus Catalogorum i, 84[a]; iii, 18.

This work is described in the I. O. Cat. pt. VII No. 3930.

Edited in Kāvyamālā 1.

कलाविलासकाव्य Kalāvilāsakāvya

No. 66 373. / 1887-31.

Size.— $8\frac{1}{3}$ in. by $4\frac{2}{5}$ in.

Extent.-12 leaves ; 10 lines to a page ; 28 letters to a line. foll. 22-30
16 ,, ,, ,, ,, 49 ,, ,, ,, ,, ,, ,, 31-34

Description.— Country paper ; Devanāgarī characters ; handwriting clear and legible but not uniform ; borders ruled in two double black lines, folios 1-21 missing.

The Ms contains sargas 5-10 only.

Age.— The Ms. does not appear to be very old.

Author.— Kṣemīndra.

Begins— (abruptly) fol. 22[a]

.....थ्येन सत्वरहिताः को जानाति स्फुटं वेश्याः ॥
वर्णनदयितः कश्चित घनदयितोदासकर्मदयितोन्यः ॥ ४० ॥
रक्षादयितश्चान्यो वेश्यानां नर्मदयितोन्यः ॥ ४१ ॥
इति श्रीक्षेमेंद्रकृते कलाविलासे वेश्यावृत्तं नाम चतुर्थः सर्गः ४ etc.

Ends.— fol. 34[a]

उक्तेति etc. up to सततं सताम् ॥ ४३ ॥
as in No. 65

followed by इत्याचार्यक्षेमींद्रकृते कलाविलासकाव्ये सकलकला-निर्द्धारणं नाम दशमः सर्गः शुभं श्रीः छ

References.— See No. 65

कादंबरीकथासार Kādaṁbarīkathāsāra

No. 67 434. 1899–1915.

Size.— $6\frac{4}{5}$ in by $9\frac{3}{4}$ in.

Extent.— 43 leaves; 17 lines to a page; 17 letters to a line.

Description.— Smooth country paper; old in appearance; Kāśmīrī devanāgarī characters; hand-writing bold, clear and legible; slightly moth-eaten; red pigment used for marking chapter-colophons; folios 31-38 missing.

The Ms. was written by one Durgāprasāda at Jambū-nagar in Kāśmīra in Saṁvat 1926.

Age.— Śaṁvat 1926.

Author.— Abhinanda, son of Jayanta Bhaṭṭa.

Begins— fol. 1[b]

ॐ स्वस्ति श्रीगणेशाय नमः ॐ नमः सरस्वत्यै

श्रियं दिशंतु वश्चौरैर्द्धये तुल्यश्रमाः क्रमाः
ये चादौ गोष्पदं पश्चात्त्रैलोक्यं क्राम्यतश्च ये १
सरसास्सदलंकाराः प्रासादमधुरागिरः
कान्तास्तातजयन्तस्य जयन्ति जगतां गुरोः २ etc.
गुणोद्योतनदीपानां सतां न परमुज्वलं
यावन्मलिनमप्येषां कर्मदृष्टेः प्रसाधनं ३
गुणः कृशोपि प्रथते पृथुरप्यपचीयते
प्राप्य साधु खलौ चन्द्रः पक्षाविव सितासितौ ४
शक्तिनाभावद्गौडो भारद्वाजकुले द्विजः
दार्वाभिसारमासाद्य कृतदारपरिग्रहः ५
तस्य मित्राभिधानो भूदात्मनस्तेजसां निधिः
जनेन दोषोपरमप्रबुद्धेनार्चितोदयः ६
सशक्तिस्वामिनं पुत्रमवाप श्रुतिशालिनं
राज्ञः कर्कोटवंशस्य मुक्तापीडस्य मन्त्रिणम् ७
कल्याणस्वामिनामास्य याज्ञवल्क्य इवाभवत्
योगवित्तनयः शुद्धो निर्धूतभवकल्मषः ८

अगाधहृदयात्तस्मात्परमेश्वरमंडनं
अजायत सुतः कान्तश्चन्द्रो दुग्धोदधेरिव ९
पुत्रं कृतजनानन्दं स जयंतमजीजनत्
आसीत्कवित्ववक्तृत्वफला यस्य सरस्वती १०
वृत्तिकार इति व्यक्तं द्वितीयं नाम बिभ्रतः
वेदविदांगविदुषः सर्वशास्त्रार्थवादिनः ११
जयंतनाम्नः सुधियः साधुसाहित्यतत्ववित्
सूनुस्समुदपद्यत्तस्मादभिनन्द इति श्रुतः १२
काव्यविस्तरसन्धान वैदाल सधियः प्रति
तेन कादम्बरीसिन्धोः कथामात्रसमुद्धृतं १३

folio 7[a] इति श्रीविपश्चिद्वराग्रगण्याचार्यश्रीभट्टजयंतसूनोरभिनन्दस्य कृतौ **कादंबरीकथासारे** प्रथमः सर्गः १

folio 13[a] इति विपश्चिद्वराभिनंदकृते **कादंबरीकथासारे** द्वितीयः सर्गः
folio 19[b] इति etc. ... ... तृतीयः सर्गः
folio 26[a] इति etc. ... ... चतुर्थः सर्गः
folio 44[b] इति **कादंबरीकथासारे** सप्तमः ॥

Ends.— fol. 51[a]

इति विततविलासः पुंडरीकेन साकं—
दिवि भुवि च विचित्रोद्यानलीलाविहारः ।
अभिमतफलसंपद्वर्धमानाभिनन्दः ॥
श्रियमभजनचंद्रापीडमूर्त्तिर्मृगांकः ॥

इति श्रीसकलविपश्चिच्चक्रवर्तिश्रीभट्टजयंतसूनोरभिनन्दस्य कृतौ **कादंबरीकथासारेष्टमः** सर्गः समाप्तोयं **कादंबरीकथासारः** ॥ शुभसंवत् १९२६ अश्वते चतुर्थ्यां पर्ता पंचभ्याम् ॥ शुभमस्तु सर्गजगताम्

On folio 1[a] we have:—

कादंबरीकथासारः अभिनंदकृतः प्रारभ्यते इदं पुस्तकम् **दुर्गाप्रसाद-शर्मणोविदः** स्वांतविश्रांतिकारणम् **काश्मीरदेशीये जंबूनगरे** लिपिकर-करेण लेखितम् संवत् १८२६ अस्य पत्रसंख्या ५० सर्गाः शुभम्—

References.— 1 Aufrecht's Catalogus Catalogorum i, 92[a]; ii, 17[b];
2 Winternitz— History of Indian Literature- Vol. III p. 74
3 A. B. Keith in his History of Sanskrit Literature remarks

" to the same century (9th ?) and Kashmir belongs Abhinanda, son of Jayanta Bhaṭṭa, the logician, who wrote an epitome in epic form of the *Kādambarī* of Bāṇa, styled the Kādambarīkathāsāra, and who mentions Rajaśekhara as a contemporary " p. 135.

Bühler regards Abhinanda to have lived not later than 830-850 A. D. cf. his article 'Abhinanda the Gauḍa' in Indian Antiquary, Vol. II. pp. 102-6

4 Printed Edition— The work is published in the 'Pandit' Vol. I. pp. 136, 155, 174 and Vol. II. pp. 3. 29, 52.— 1866-67

कादंबरीकथासार Kādaṁbarīkathāsāra

No. 68 433. 1899-1915

Size.— 7 in. by 10 in.

Extent.— 8 leaves ; 18 lines to a page ; 17 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing bold, clear and legible ; folios not numbered ; slightly moth-eaten ; yellow pigment used only once ; some portion written in the margin of the last folio ; incomplete.

The Ms. contains some portion of the 5th canto, the 6th canto and a few verses of the 7th canto.

Age.— The Ms. appears to be old.

Author.— Abhinandana, son of Jayanta Bhaṭṭa.

Begins.— (abruptly)

..... व मम चेतसि वर्तते अवैमि पुण्डरीकावत् किन्नरानुसृतिक्रमः सकालपरिणामेन न जाने किं फलिष्यति ॥ अथवा यौवनोन्मादकृत एव मम भ्रमः etc. ....

after two folios:—

इति श्रीकादंबरीकथासारे पंचमः सर्गः ॥ ५ ॥

Last folio:—

इति श्रीजयंतसूनोरभिनंदनस्यकृतौ कादंबरीकथासारे शष्टसर्गः ॥ ६ ॥

Ends.—

पत्रलेखां पुरस्कृत्य विप्रचर्याविचक्षणां
केयूरकं च तत्रैव दिनंतां भुवमाययौ ॥
आयांत्याश्च तदा तस्या दु.....परंपरा
प्रादुर्बभूव बालाया हृदयोत्कंपकारिणो ॥ etc.

References.— See No. 67

कार्तवीर्योदयकाव्य — Kārtavīryodayakāvya

No. 69 — 328. / 1884-87

Size.— $9\frac{1}{4}$ in. by $5\frac{1}{3}$ in.

Extent.— 40 leaves ; 13-14 lines to a page ; 32 letters to a line.

Description.— Country paper ; Devanāgrai characters ; old in appearance ; hand-writing clear, legible and uniform ; borders ruled in double black lines ; folios 29-32 missing ; red pigment frequently used ; edges of folios worn out.

Age.— Saṁvat 1763, śaka 1628.

Author.— Candracūḍa.

Subject.— A work describing the achievements of king Kārtavīrya (Cf. Bikaner Catalogue. No. 296)

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥
अधिवदनमुभायाः सव्यमुद्दामभावं
सुकुलितमपि जाग्रद्दक्षिणं धर्ममेघे ॥

स्मरवपुषि च वामं यस्य नेत्रं तृतीयं
स भवतु मम भूत्यै वल्लभः शैलजायाः ॥ १ ॥

fol. 4[b] इति प्रथमः सर्गः ॥ छ ॥

fol. 9[b] इति द्वितीयः सर्गः ॥ छ ॥

Ends.— fol. 44[a]

यो विद्वद्विजराजराजितगुणात्पुण्येन जन्मापवान्
भट्टश्रीपुरुषोत्तमात्कुलमणे दुर्गाविकानंदनः ॥
तेनोक्ते सति चंद्रचूडकविना श्रीकार्त्तवीर्योदये
काव्ये पूरिचतुर्दशः श्रुतिसुखः सर्गोसपर्गोज्वलः ॥ ४५ ॥ छ ॥

इति श्रीचंद्रचूडविरचिते कार्त्तवीर्योदये काव्ये चतुर्दशः सर्गः ॥छ॥

सूंबेकरपुरुषोत्तमभट्टसुतश्चंद्रचूडाख्यः ॥ श्रीकार्त्तवीर्यनृपतेश्चरितं चक्रे तदुत्तमा शृणुत ॥ छ ॥ छ ॥ छ ॥

संवत् १७६३ वर्षे शाके १६२८ प्रवर्त्तमाने दक्षिणायनगते श्रीसूर्ये महामांगल्यप्रदेशे माघमासे शुक्लपक्षे आयद्वादशी रविवारे लिखितोयं ग्रंथः छ
भग्नपृष्टि etc.....कष्टेन परिपाल्यतां ॥ छ ॥
भटलक्ष्मधरात्मजनारायणेन लिखितोयं ग्रंथः समाप्तिं प्रापत् ॥ छ ॥

References.— 1 Mss.- Aufrecht's :Catalogus Catalogorum— i, 96[a]; ii, 18[b]; iii, 21[a]

For described Ms see Bikaner Des. Cat. No. 296

कार्तवीर्योदयकाव्य Kārtavīryodayakāvya

No. 70 284. / 1884-86.

Size. — $8\frac{1}{4}$ in. by $4\frac{3}{5}$ in.

Extent.— 50 leaves; 10 lines to a page; 32 letters to a line.

Description.— Country paper; Devanāgarī characters; old and discoloured; hand-writing clear, legible and uniform; borders ruled in double black lines; left-hand corners of some folios moth-eaten; folios 35-9 missing.

Age.— Samvat 169(3); śaka 1558.

Anthor.— Candracūḍa.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥

अधिषदनमुभायाः ete. as in No. 69

fol. 4[b] इति प्रथमः सर्गः ॥

fol. 7[b] इति द्वितीयः सर्गः ॥

Ends.— fol. 55[a]

यो विद्वद्विजरा etc. up to सर्गोपवर्गोज्वलः ॥ ५५ ॥

as in No. 69

followed by इति श्रीचंद्रचूडविरचिते कार्त्तवीर्योदये काव्ये चतुर्दशः (सर्गः) ॥ छ ॥

सूंबेकरपुरुषोत्तमभट्टसुतश्चंद्रचूडाख्यः ॥

श्रीकार्त्तवीर्यनृपतेश्चरितं चक्रे तदुत्तमाः शृणु ॥ छ ॥

संवत् १६९२ शके १५५८ पार्थिवसंवत्सरे ज्येष्ट वदि पंचम्यां लिखितं पुस्तकं चंद्रचूडभट्टानां ॥ ॥ छ ॥

भग्नपृष्टि etc.....यत्नेन परिपाल्यतां ॥ ॥ छ ॥

References,— See No. 69

काव्यदुर्घटसाधन Kāvyadurghaṭasādhana

No. 71 123. 1875-76.

Size.— $9\frac{3}{4}$ in. by $4\frac{2}{5}$ in.

Extent.— 19 leaves; 17 lines to a page; 50 letters to a line.

Description.— Country paper; old but well preserved; Devanāgarī characters; hand-writing small but clear, legible and uniform; पृष्टमात्रास used; borders ruled in two double black lines; blank spaces (with one or two letters in them) left in the middle of the folios; red pigment used.

The work contains the following colophons—

(1) fol. 8[b] इति श्रीराजकुण्डविरचिते रघुदुर्घटसंपूर्णीभूतः ।

(२) fol. 13^{b} इति वैद्यराजकुण्डविरचिते दुर्घटं संपूर्णं कुमारसंभवस्य ।

(३) fol. 15^{a} इति श्रीरा० इति मेघदूतः ॥

Age.— The Ms. appears to be old.

Author.— Rājakuṇḍa.

Subject.— Kāvya: explanation of difficult passages from रघुवंश, कुमारसंभव, मेघदूत and किरातकाव्य

Begins.— fol. 1^{a}

॥ ६० ॥ क्रीडानिर्मितवामजाद्भुततनुः छद्मोदयालंबिना
येनाबंधिरसातले दितिसुतो द्वेषाद्बलिलीलया ।
यैन क्रोडकलेवरेण वसुधा मग्नाधृतांभोनिधे-
स्तस्मैकं समथेनिकत्वमधुके नित्यं नमो विष्णवे ॥ १ ॥
ज्ञात्वा पाणिनिशास्त्रमद्भुततमं दृष्ट्वाथ चांद्रं मतं
कालापंचलमस्तकाव्यनिचयं धातोश्च पारायणं ।
धातोर्वृत्तिमनुत्तमां तदपरं नाम्नां च पारायणं
वैद्यो दुर्घटसाधनं वितनुते श्रीराजकुडः कविः ॥ २ ॥ etc.

folio 2^{a} इतिरघुदुर्घटे प्रथमसर्गः ॥ १ ॥

folio 3^{b} इति द्वितीयः सर्गः ॥

folio 4^{a} इति तृतीयसर्गः ॥

folio 5^{a} इति चतुर्थसर्गः ॥

folio 5^{b} इति पंचमसर्गः ॥

Ends.— fol. 19^{b}

हितोपदेशैरुपकारवंत इति कथं यावदुपकारशब्दादन्तामत्वः प्रयोगो नास्ति इतिरपि नास्ति यदाहभाष्यकारः एकाक्षराकृतो जातेः सप्तम्यां च ततौ स्मृताविति ॥ इदं कांतवचनं यदाह ॥ भण्यत कार्यानिमित्तत्वेनाश्रये इति धरणान्मतं ॥ अष्टादशः सर्गः ॥ इति श्रीकिरातकाव्ये दुर्घटानि समाप्तानि ॥ यथा लिखितानि ॥ श्रीरस्तु ॥ कल्याणमस्तु लेषकवाचकयोः ॥ शुभं भवतु ॥

References.— Aufrecht refers to this Ms. only in his Catalogus Catalogorum (i, p. 108) and mentions it under किरातार्जुनीय as किरातार्जुनीयकाव्यदुर्घट.

काव्यामृत Kāvyāmṛta

No. 72 329. / 1848-87.

Size.— $8\frac{1}{4}$ in. by $3\frac{3}{4}$ in.

Extent.— 42 leaves ; 10 lines to a page ; 20-22 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing not quite clear and legible ; red pigment used for verse-numbers ; borders ruled in double black lines ; many folios missing ; corners of last few folios slightly damaged ; incomplete.

Age.— The Ms appears to be old.

Author.— Keśavapaṇḍita.

Begins.— (abruptly) fol. 3^a

जगदेकबंधो संजल्पतामिति वचो न भवप्रवाह ॥ १४ ॥
यत्पादपंकजरजो न जहाति वेधा लक्ष्मीभवस्त्रिदशवंदितपादपद्मः ।
लीलात्तमानुषवपुः पुरुषोत्तमोसौ श्रीराम एव शरणं सततं ममास्तु ॥ १ ॥
इति श्री श्री(म)त्पंडितनानात्म(ज)केशवाविरचिते काव्यामृते श्रीराम
...ष्टिकरो नाम प्रथमः सर्गः ॥ १ ॥etc.

Ends.— fol. (abruptly) 80^b

रामः ॥ रे रे निशाचर परोचरितं गृहाणा दिव्यं धनुस्त्रिदशदपहिरं शरं...
निर्वापयामि विरहासिमहं प्रियाया तर...नेत्रजसप्रवाहैः ।

किरातकाव्य Kirāta-Kāvya
or or
किरातार्जुनीय Kirātārjunīya

No. 73 73. / A 1879-80.

Size.— 8 in. by $4\frac{2}{5}$ in.

Extent.— 118 leaves ; 8 lines to a page ; 24 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing clear and legible; borders ruled in double red lines; folios numbered in the left-hand margin; folios 22 to 35 missing; edges of some folios slightly worn out.

Age.— Saṁvat 1830.

Author.— Bhāravi.

Begins.— fol. 1[a]

॥ श्रीगणेशाय नमः ॥

श्रीरामरमणं नत्वा स्मृत्वा तत्पदपंकजं ॥
श्रीगोपालमनस्तुष्टयै लिख्यते भारवेः कृतिः ॥ १ ॥

श्रियः कुरूणामधिपस्य पालिनी प्रजासुवृत्तिं यमयुंक्त वेदितुं ॥
सवर्णालिंगी विदितः समाययौ युधिष्ठिरं द्वैतवने वने...रः ॥ १ ॥
कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेद...ष्पतः ॥
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छंति मृषाहिं...षिणः ॥२॥ etc.

folio 7[a] काव्ये किरातार्जुना(नी)यनाम्नि लक्ष्म्यंकइंदुममितसमाप्तिं ॥
सर्गः कृतौ भारविपंडितस्य प्राप्तः प्रसादाजगदीश्वरस्य ॥ १ ॥ छ

foiio 14[a] इति श्रीकिरातार्जुनीये महाकाव्ये द्वैपायनागनागमो नाम द्वितीयः सर्गः ॥ २ ॥

folio 40[b] इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके कविचक्रवर्ति-श्रीभारविकृतौ सुरसुंदरीप्रस्थानो नाम षष्ट· सर्गः ॥ ६ ॥ छ ॥

folio 46[b] इति etc. ... ... सुरसुंदरीप्रकीलगमनं नाम सप्तम सर्गः ॥ ७ ॥

folio 54[b] इति etc. ... ... पुष्पावचयजलाकलिवर्णनो नाम अष्टमः सर्गः ॥ ८ ॥

folio 64[a] इति etc. ... ... चंद्रोदयसींधुपानसंभोगवर्णनो नाम नवमः सर्गः ॥ ९ ॥

folio 73[a] इति etc. ... ... प्रलोभनार्थो नाम दशमः सर्गः ॥ १ ॥

folio 81[a] इति etc. ... ... महेंद्रागमनो नाम एकादशः सर्गः ॥११॥

folio 87[b] इति etc. ... ... हरसैन्यनिवेशो नाम द्वादशः सर्गः ॥१२॥

folio 96[b] इति etc. ... ... दूतवाक्यं नाम त्रयोदशः सर्गः ॥१३॥

folio 105[a] इति etc. ... ... धनंजयाभिगो नाम चतुर्दशः सर्गः ॥१४॥
folio 110[b] इति etc ... ... शिवार्जुनसंग्रामे पंचदशः सर्गः ॥ १५ ॥
folio 118[b] इति etc. ... ... अस्त्रयुधो नाम षोडशः सर्गः ॥ १६ ॥
folio 126[a] इति etc. ... ... अस्त्रापहरो नाम सप्तदशः सर्गः ॥ १७ ॥

End.— fol. 132[a]

व्रजजयरिपुलोकं पादपद्मा ततः स-
नादित इति भवेन श्लाघितो देवसंघैः ॥
निजगृहमथ गत्वा सादरं पांडुपुत्रो
धतजयगुरुलक्ष्मीर्धर्मपुत्रं नमाम ॥ ४८ ॥

इति श्रीकिरातार्जुनीये महाकाव्य भारविविरचिते लक्ष्म्यंके धनंजयस्यास्त्रलाभो नामाष्टादशः सर्गः ॥ १८ ॥ समाप्तोयं किरातः ॥ संवत् १८३० वर्षे पोसमासे शुक्लपक्षे त्रित्तियगुरुवासरे लिखितमिदं पुस्तकं समाप्तं॥श्रीरस्तु॥ ॥ शुभं भवतु ॥

References.—1 Aufrecht's Catalogus Catalogorum i 107[b], 779[b]; ii 21[b], 194[a]; iii, 23[b].

2 Winternitz— History of Indian Literature, Vol. III pp. 66f, 508, 646.

3 A. B. Keith— History of Sanskrit Literature, pages 109-16.

4 Descriptive Catalogue of Mss., Madras, Vol. XX p. Nos. 11464-11479.

5 Printed Editions—*Old Editions*:— Edited by Vidyākara Miśra and Babu Rāma, Kidderpore, 1814; 2 Ed. by Tārānāth Śarman in conjunction with several other pandits; 3 with the com. of Mallināth, edited and published by Jīvānanda Vidyāsāgara, Calcutta, 1875; 4 Text without com. Calcutta, 1868; 5 Text only, edited by Eshwar Chandra Vidyāsāgara, Calcutta, 1853; 6 Kirātārjunīya, Sargas I-X with Mallinātha's comm. edited by Sarasvati Tiruvengaḍa Ācārya and Vaṅgīpuram Rāmakṛishna Ācārya, Madras 1860; 7 Sargas 1-5 with Mallinātha's comm. Poona 1844-55. 8 Gesang I and II. Aus dem Sanskrit über setzt von. c. Schütz, Beelefeld, 1845.

New Editions:—

1 Cantos I–III with Mallinath's comm. notes and English translation by M. R. Kale, 1928; 2 with the comm. of Mallinātha, Nirṇayasāgara Press, Bombay; 3 with the comm. शब्दार्थदीपिका of चित्रभानू (sargas 1-3); 4 with Engl. translation by L. R. Pangarkar cantos I-X; 5 ed. by गुरुनाथ विद्यानिधि; 6 ed. by Haripada Chattopādhyāya; 7 trans. from the original sanskrit into German and explained by Prof. Carl. Cappeller Horward 1912 etc.

किरातार्जुनीय Kirātārjunīya

No. 74 619. 1882-83.

Size.— 9⅕ in. by 4 in.

Extent.— 116 leaves; 7 lines to a page; 25 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing bold, cleār, legible and uniform; marginal notes; borders ruled in double black lines; red pigment used; folios 14 to 21, 89, 116 and 126 missing; folios 1–5 slightly damaged; edges of the folios also slightly damaged.

The Ms. contains 16 sargas and 1-60 verses of the 17th sarga.

Age.— The Ms. appears to be old.

Author.— Bhāravi.

Begins.— fol. 1^{b}

॥ ॐ नमो श्रीगणेशाय ॥

श्रियः कुरूणामधिपस्य पालनीं प्रजासुवृत्तिं यमयुंक्त वेदितुं ।
सवर्णिलिंगी विदितः समाययौ युधिष्टिरं द्वैतवने वनेचरः ॥ १ ॥ etc.

folio 7^{b} इति श्रीकिरातार्जुनीये लक्ष्म्यंके महाकाव्ये भारविकृतौ कोपप्रदीपनो नाम प्रथमः सर्गः ॥ १ ॥

folio 25[b] इति श्रीकिरातार्जुनीये महाकाव्ये कविश्रीभारविकृतौ लक्ष्म्यंके शरद्वर्णनं नाम चतुर्थः सर्गः ॥ ४ ॥ etc.

Ends.— fol. 127[b]

आक्षिप्तचापावरणेषु जालः छिन्नोत्तमासिः समृधेऽवधूतः ॥
रिक्तः प्रकाशश्च बभूव भूमे । रुत्सादितोद्यान इव प्रदेशः ॥ ५९ ॥
स खंडनां प्राप्यपरामर्षवान् । भुजाद्वितीयोऽपि विजेतुमिच्छया ॥
ससर्ज वृष्टिं परिरुग्णपादपां । जवेन मेघः पयसामिवाश्मनां ॥ ६० ॥
ends abruptly—

References.— See No. 73

किरातार्जुनीय
with
घण्टापथ

Kirātārjunīya
with
Ghaṇṭāpatha

No. 75

554.
Viśrāma(i)

Size.— 13¼ in. by 4¼ in.

Extent.— 48 leaves; 8 lines to a page; 52 letters of the comm. and 24 letters of the text to a line.

Description. — Modern paper; Devanāgarī characters; borders ruled in double black lines; text in the middle and comm. below and above the text; folio-numbers in both margins; separate pagination for each canto.

The Ms. is a lithograph copy and contains cantoes 1 and 3

Age.— Śaka 1767.

Author (of the text).— Bharavi.

,, ,, ,, comm.)— Mallinātha.

Begins(text).— fol. 2[b]

श्रियः कुरूणामधिपस्य पालनीं प्रजासुवृत्तिं यमयुंक्त वेदितुं ।
सवर्णिलिंगीविदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥ etc.

Comm. folio 1[b]

श्रीगणेशाय नमः श्रीसरस्वत्यै नमः

अर्द्धांगीकृत दांपत्यमपि etc. .....

folio 25[a] इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घंटापथसमाख्यायां प्रथमः सर्गः ॥

Ends.—fol. 20[b]

(text) अनुजगुरथ दिव्यं दुंदुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिंगस्फुरंती
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥

(comm.) अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलंकारः तत्र चाप्रस्तुतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्यां भेदे अभेदलक्षणातिशयोक्तिवशादालिंगनोक्तिरिति रहस्यमेवमतिशयोक्त्यनुप्रणीता समासोक्तिः प्रियकथनात्स्नेहमुज्जीवयंती तदंगभावं भजत इत्युभयोरंगांगिभावेन संकर इति विवेचनीयम् ६० इति श्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां तृतीयः सर्गः सप्तर्तुसंख्येंदुमिते शाके पुण्याख्यपत्तने यत्नतः पाठशालायामंकितोऽयं शिलाक्षरैः ॥

References.— 1 Aufrecht's Catalogus Catalogorum— i, 108[a], 779[b]; ii, 21[b], 194[a]; iii, 24[a].

2 H. D. Velankar, B.B.R.A.S. Mss. Catalogue— ii, p. 333.

3 Descriptive Catalogue of Mss. Madras— Vol. XX Nos. 11482-11492.

4 Printed Editions—For printed editions see No. 73

किरातार्जुनीय
with
घण्टापथ

Kirātārjunīya
with
Ghaṇṭāpatha

No. 76

553.
Viśrāma (i)

Size.—
Extent.—
Description.— } Same as above i. e. No. 75.

The Ms. is a lithograph copy and contains cantoes 1-3 ; 68 leaves.

Text Begins on fol. 2[b]

श्रियः कुरूणामधिपस्य etc. ..... as in No. 75

Comm. begins on fol. 1[b]

श्रीगणेशाय नमः श्रीसरस्वत्यै नमः

अर्द्धोगीकृतदांपत्यमपि etc. ..... as in No. 75

folio 25[a] इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घंटापथसमाख्यायां प्रथमः सर्गः ॥

folio 20[b] इति etc. ... ... द्वितीयः सर्गः समाप्तः

Ends— fol. 20[b] 21[a]

(text) अनुजगुरथादित्यं etc. ..... as in No. 75

(comm.) अत्र विशेषणमात्र etc. ..... as in No. 75

References.— See No. 75

किरातार्जुनीय
with
घण्टापथ

Kirātārjunīya
with
Ghaṇṭāpatha

No. 77

252.
Viśrāma(i)

Size.— $13\frac{2}{5}$ in. by $5\frac{2}{5}$ in.

Extent.— 18 leaves ; 10–11 lines to a page ; 45 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders ruled in two double red lines ; text in the middle and the comm. below and above the text ; title of the work in the left-hand margin and folio-numbers in the right-hand margin ; fol. 18 slightly moth-eaten.

The Ms. contains only the 1st canto.

Age.— The Ms. appears to be old.

Author (of the text).— Bhāravi.

,, ,, ,, comm.)— Mallinātha.

Text begins on fol. 3[a]

श्रीगणेशाय नमः ॥ श्रियः कुरुणामधिपस्य etc.

as in No. 75

Comm. begins on fol. 1[b]

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

अर्द्धांगिकृतदांपत्यमपि etc. ..... as in No. 75

Ends.— fol. 18[a]

(text) विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ॥
रिपुतिमिरमुदस्यो दीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥ ४६ ॥

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृतौ द्रौपदीवाक्यकथनो नाम प्रथमः सर्गः ॥ १ ॥ छ ॥

(comm.) भारविकृत इति कविनामकथनं महाकाव्य इति महच्छब्देन लक्षणसंपत्तिः सूचिता किरातार्जुनीयं इति काव्यवर्ण्ययोः कथनं प्रथमः सर्गः समाप्त इति शेषः ॥ एवमुत्तरत्रापिति द्रष्टव्यं ॥ किरातावर्जुनावधिकृत्य कृतो ग्रंथः किरातार्जुनीयं ॥ शिशुक्रंदयम सम समद्वंदेद्रजनतादिभ्यच्छ इति द्वंद्वाच्छप्रत्ययः ॥ राघवपांडवीयमितिवत् ॥ तथार्जुन एवात्र नायकः किंरातस्तु तदुत्कर्षकथनं च धिनोतिन इति ॥ अथायं संग्रहः ॥ तेनामध्यमपांडवो भगवतो नारायणस्य प्रभुस्तस्योत्कर्षकृते तु ॥ वर्ण्यति ॥ तथा दिव्यः किरातः पुनः ॥

शृंगारादिव सोथ मंत्रविजयीवीरप्रधानं रसः ।
शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलं ॥ ४६ ॥
इति श्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घंटापथसमाख्यायां प्रथमः सर्गः ॥ छ ॥ छ ॥

References.— See No. 75

किरातार्जुनीय
with
घण्टापथ

Kirātārjunīya
with
Ghaṇṭāpatha

No. 78

80.
1919-24.

Size.— $9\frac{2}{5}$ in. by $3\frac{3}{4}$ in.

Extent.— 253 leaves; 7-8 lines to a page; 30 letters to a line for first 25 folios; 8-10 lines to a page and 34 letters to a line for the next 125 folios; 15 lines to a page and 40 letters to a line for the next 25 folios; 12-14 lines to a page and 38 letters to a line for the last 78 folios.

Description.— Country paper; old and musty; Devanāgarī characters; hand-writing clear and legible but not uniform; borders ruled in red and black lines; red pigment used; separate pagination for every canto; slightly moth-eaten; 74 leaves for the text and 179 leaves for comm.

The text contains 15 cantos and 8 stanzas of the 16th canto while the comm. contains 15 cantos.

Age.— The Ms appears to be old.

Author (of the text).— Bhāravi.

„ „ „ comm.)— Mallinātha.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥ श्रीकुलदेव्यै नमः ॥ श्रीरामचंद्राय नमः ॥
(text) श्रियः कुरूणामधिपस्य etc. ..... as in No. 73

[Kāvya] 13.

folio 6[b] इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृतौ दूत-गमनो नाम प्रथमः सर्गः ॥ छ ॥

folio 12[b] इति etc. ... ... द्वितीयः सर्ग(:) समाप्तिमगमत्

ends on folio 15 of 15th सर्ग

.....इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृतौ पंचदशः सर्गः ॥ छ ॥

(text) रथांगसंक्रीडितमश्वहेषा बृंहंति मत्तद्वीपबृंहितानि ॥
संघर्षयोगादिव मूर्छितानि ह्रादं निगृह्णाति न दुंदुभीनां ॥ ८ ॥
अस्मिन् यशः पौरुषलोलुपानामरातिभिः प्रत्युरसंक्ष...

(comm) श्रिगणेशाय नमः श्रिसरस्वत्यै नमः श्रिदेव्यै नमः श्रिरामचंद्राय नमः श्रिगुरुभ्यो नमः ॥ विहितामिति ॥ अथ द्रौपदीवाक्यश्रवणानंतरं वृकोदरः भीमः प्रियया द्रौपद्या प्रियाग्रहणं अस्यापि हितोपदेशनात्यर्थसूचनार्थं ॥ etc.··· folio 24[a] of comm.

इति श्रीकोलाचलमल्लीनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां द्वितीयः सर्गः समाप्तिमव्रजत् ॥ छ छ

Ends.— fol. 30[b] of the 15th sarga of comm.

मुनीनामंगानि गात्राणि अभिन्नमविरलं अंचिततरं अतिरुचिरं रोमांचं रोमहर्षं बिभरां बभूवुः बभुः । भीद्रीत्यादिना विकल्पादाप्रत्ययः ॥ ५३ ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीय-व्याख्यायां घंटापथसमाख्यायां पंचदशः सर्गः ॥ छ छ ॥

References.— See No. 75

किरातार्जुनीय	Kirātārjunīya
with	with
घण्टापथ	Ghaṇṭāpatha
No. 79	251.
	Viśrāma (i)

Size.— $11\frac{3}{5}$ in. by $5\frac{2}{5}$ in.

Extent.— 284 leaves ; 9-10 lines to a page ; 44 letters to a line.

Description.— Country paper; white in appearance; Devanāgarī characters; hand-writing clear, legible and uniform; text in the middle with the comm. below and above it; borders ruled in double red lines; separate pagination for every canto; folio 1[a] of the 17th canto missing; folios numbered in both margins.

The Ms. contains 2-18 cantos.

Age.— The Ms. is not very old.

Author (of the text).— Bhāravi.

,, (,, ,, comm.)— Mallinātha.

Begins— fol. 1[a]

(text) विहितां प्रियया मनः प्रियामथ निश्चित्य गिरं गरीयसीं ॥
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ १ ॥ etc.

comm. श्रीगणेशाय नमः ॥ विहितामिति etc. ..... as in No. 78 folio 1[a] of 3rd canto

इति श्रीमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां द्वीतीयः सर्गः

Ends.— fol. 14[a] of 18th canto

(text) व्रजजयरिपुलो(कं पा)दपद्मानतः सन्नुदित इति भवेन श्लाघितो देवसंघैः ।
निजगृहमथ गत्वा सादरं पांडुपुत्रो धृतगुरुजयलक्ष्मीर्धर्मसूनु(नुं) ननाम ४८

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकृतौ वरप्रदानो नामाष्टादशः सर्गः ॥

(comm.) तमोऽपहाररूपं बभारं वोढुस्थितं स्वधाम्ना स्वतेजसा लोकानामुपरि कृतस्थितिकृतपदमन्यत्र उपरि वर्त्तमानं तपो लक्ष्म्यादाप्रतं पांडवं अमरा इंद्रादयः दिनकृतं सूर्यमिवोच्चैरुपजग्मुः साधु महाभागोसीति तुष्टुवुः । शिखरिणि वृत्तं ४७

जगति सकल etc. ..... as in No. 81 below

इति श्रीपदवाक्यप्रमाणपारावारपारीणमहोपाध्यायकोलचलमल्लिनाथसूरिविरचितायां किरातायां किरातार्जुनियव्याख्यायां घंटापथसमाख्यायां अर्जुनवरप्रदानो नामाष्टदशसर्गः ॥ १८ ॥

References.— See No. 75

किरातार्जुनीय
with
घण्टापथ

Kirātārjunīya
with
Ghaṇṭāpatha.

No. 80

228.
Viśrāma(i)

Size.— 14 in. by 7 in.

Extent.— 131 leaves ; 16 lines to a page ; 54 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing clear, legible and uniform ; text in the middle and the comm. above and below it ; borders ruled in double red lines ; folios numbered in both margins ; red pigment used for verse-numbers and yellow for corrections ; folio 11 missing.

The Ms. is complete in 18 sargas.

Age.— Śaka 1748.

Author (of the text).— Bhāravi.

,, ,, ,, comm.)— Mallinātha.

Begins.— fol. 1^b

श्रीगणेशाय नमः श्रीवरदगणपतये नमः ॥

(text) श्रियः कुरूणामधिपस्य etc. ... .. as in No. 75

(comm.) अर्द्धांगीकृतदांपत्यमपि etc. ..... as in No. 81 below

folio 20^b इति महोपाध्यायमल्लिनाथसूरिविरचितायां किरातार्जुनीय-व्याख्यायां घण्टापथसमाख्यायां द्वितीयः सर्गः ॥ छ ॥

folio 29^b इति etc. ... ... तृतीयः सर्गः समाप्तः ॥ ३ ॥

Ends.— fol. 131^b

(text) व्रजजयरिपुलोकं etc. ..... as in No. 79

(comm.) व्रजेति । शिवेन व्रज स्वपुरं गच्छारिलोकं जयेति गदितः उक्तः यतो पादपद्मानतः शिवपादपंकजानतः सभू । तथा देवसंघैश्लाघित स्तुतोऽत एव धृता गुर्वी जयलक्ष्मीर्येन सं पांडुपुत्रोर्जुनः निजगृहं स्वाश्रमं गत्वा प्राप्याथ सादरं यथा तथा धर्मसूनुं राजानं ननाम नमनं चकार ॥ ४८ ॥

इति श्रीपदवाक्यप्रमाणपारावारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां अर्जुनवरप्रदानो नामाष्टादशः सर्गः ॥ १८ ॥ छ ॥ शके १७४८ व्ययनाम संवत्सरे चैत्र शु° ३

References.— See No. 75

किरातार्जुनीय
with
घण्टापथ

Kirātārjunīya
with
Ghaṇṭāpatha

No. 81

35.
1916–18.

Size.— 10½ in. by 5⅜ in.

Extent.— 28 leaves; 11–12 lines to a page; 38 letters to a line.

Description.— Country paper; old in appearance: Devanāgarī characters; hand-writing clear, legible and uniform; occasional marginal readings; yellow pigment used for corrections; text in the middle and the comm. above and below it; separate pagination for each canto.

The Ms. contains 4th and 5th cantos.

Age.— The Ms. appears to be old.

Author (of the text).— Bhāravi.

,, ,, ,, chmm.) — Mallinātha.

Begins— fol. 1[b]

(text) ततः सकूजत्कलहंसमेखलां सपाकसस्याहितपांडुतागुणां ॥
उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवां ॥ १ ॥ etc.

(comm.) श्रीगणेशाय नमः ॥ तत इति ॥ ततः प्रस्थानानंतरं जनप्रियः सोर्जुनः ॥ कलहंसमेखलामिवेत्युपमिते समासः ॥ अन्यत्र कलहंसाद्रवमेखलेति विशेषणसमासः ॥ कूजंती कलहंसमेखला यस्यास्तां सहपाकेन सपाकानि पक्वानि तैः

॥ श्रीगणेशाय नमः ॥ श्रीशंभवे नमः ॥
वपुरिति गौरच्छायं जयति विभोराभिदधाति गौरच्छायं ॥
विषकटुकायेनाहि श्रेणी भूषणामिव स्वकायेनाहि ॥१॥ etc.

Ends.— fol. 21[b]

ववंधुरेववंधुरे स्ववर्त्मनि स्थितिजनाः ।
पिनाकिनापिनाकिना ममोदिमोदकारिणा ॥ ६० ॥
इति त्रिपुरदहनं तृतीयाश्वासः ३

त्रैलोक्यमंगल — Trailokyamaṅgala

No. 283 — 500 (iii). / 1899-1915.

Size.— $7\frac{4}{5}$ in. by 6 in.

Extent.— 68-82 leaves; 12–13 lines to a page; 25 letters to a line.

Age.— Saṁvat 1751–83.

Begins.— fol. 68[a]

॥ श्रीराधावल्लभाय नमः ॥
अथ जुगलकिशोर सहस्रनाम लिष्यते सूतोवाच ॥

एकदा नारदं प्राप्य ॥ ब्राह्मणसुतमुत्तमं ॥
कृतांजलिपुटो भूत्वा ॥ गौतमो मुनिरब्रवीत् ॥१॥
कथं गोप्यो व्रजेरवामि ॥ गोविंदविरहातुरा ॥
तन्मनस्तद्गतप्राणा ॥ ब्रुवुर्देहान् वदस्व मे ॥२॥ etc.

Ends.— fol. 82ª

कवचस्य प्रसादेन ॥ जीवनमुक्तो भवेन्नरः ॥
त्रैलोक्यक्षोभयेदेव ॥ त्रैलोक्यविजयी भवेत् ॥ ४५ ॥
इदं कवचमज्ञात्वा ॥ यज्ञेय पुरुषोत्तमः ॥
शतलक्षप्रजप्तोपि ॥ समंत्रसिद्धिदायकः ॥ ४६ ॥
इति श्रीसनत्कुमारतंत्रे ॥ त्रैलोक्यमंगलनाम स्तोत्र संपूर्ण ॥ श्रीराधा-
वल्लभायनमः ॥

Then follow two diagrams, peculiar to the tantric works.

दण्डक

Daṇḍaka

No. 284

700.
1886-92.

Size.— $10\frac{1}{3}$ in. by $4\frac{1}{2}$ in.

Extent.— 15 leaves; 7 lines to page; 32–34 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing bold, clear and uniform; borders ruled in double red lines and edges in single; daṇḍas in red ink; complete.

Age.— Appears to be old.

Author.— Tulasīdāsa.

Begins.—fol. 1ᵇ

॥ श्रीगणेशाये नमः ॥ श्रीमते रामानुजाय नमः ॥
अथ दंडक लिष्यते ॥
देवसर्वसौभाग्यप्रदसर्वतो भद्रनिधिसर्वसर्वेश सर्वाभिरामं ॥
शर्वहृदिकंजमकरंदमधुकररुचिररूपभूपालमणिनौमि रामं ॥१॥ etc.

Ends.—fol 15 [a]

एवज्ञानविज्ञानवैराग्य ऐश्वर्यनिधिसिधि अणिमाद्यादि भूरिदानं ॥
ग्रसत भवव्याल अतित्रास तुलसीदास त्राहि श्रीरमन उरगारि-
जानं ॥ ९ ॥
इति दंडक संपूर्ण ॥ शुभं

दण्डक

Daṇḍaka

No. 285

448 (iii).
1895–1902.

Extent.— 15[a]-17[a] leaves ; 40–45 lines to a page ; 32 letters to a line.

Description.— See No. 448 (i) / 1895–1902 (दुर्घटकाव्य).

Author.— Tulasīdāsa.

Begins.— fol. 15[a]

अथ दंडक लिष्यते रघुनाथजीका ॥
देवसौभाग्यप्रदसर्वतो भद्रनिधिसर्वसर्वेशसर्वाभिरामं ॥
सर्व हृदिकंजमकरंदमधुकररुचिररूपभूपालमणिनौमिरामं ॥१॥ etc.

Ends.— fol. 17[a]

देवज्ञानविज्ञानवैराग्य ऐश्वर्य्यनिधिसिद्धि अणिमादिघादिभूरिदानं ग्रसन
भवव्यालश्रुतित्राण तुलसीदास त्राहि श्रीरमण उरगारिजानं ॥ १ ॥
इति तुलसीदासकृतं दंडक संपूर्ण

दर्पदलन

Darpadalana

No. 286

402.
1887–91.

Size,— $6\frac{1}{8}$ in. by $9\frac{4}{6}$ in.

Extent,— 34 leaves ; 20 lines to a page ; 16 letters to a line.

Description.— Country paper; Kāśmirī Devanāgarī Characters; well preserved; handwriting clear, legible and uniform; incorrect in many places; complete; on folios 1–5 the corrections are recorded in margin; red pigment used for colophons.

Age.— Not very old.

Author.— Kṣemendra.

Subject.— A diatribe against human pride.

Begins.—fol. 1[b]

ॐ नमो विघ्नहर्त्रे ॥
ओं प्रशान्ताशेषविघ्नाय दर्पसर्पापसर्प(र्प)णात् ।
नमः शमनिधानाय स्वप्रकाश विकासिने ॥
संसारवृत्तिरेकाय स्वतोत्सेकाय चेतसः ।
प्रशमामृतसेकाय विवेकाय नमोनमः ॥
क्षेमेन्द्रः सुहृदां प्रीत्या दर्पदोष चिकित्सक :
स्वास्थ्याय कुरुते यत्नं मयुरैः सूक्तिभेषजैः ॥ etc.

Ends.— fol. 34[b]

प्रशान्तोन्तस्सृस्माविषमपरिभापः शमजलै-।
रशोपस्सन्तोषामृतविरसपानेन वपूषः ॥
असंगस्संभोगः कमलदलकीलालत्व(तु)लया ।
भवारण्ये पुंसां परहितसुदरं सुखतमः ॥
इति नीतिपद्धतौ तपो विचारः समाप्तः ॥ ॥
संपूर्णेयं नीतिपद्धतिः ॥ शुभम् ॥

References:— I Mss. Aufrceht's Catalogus Catalogorum i, 254[b]; ii 52[b] iii, 53[a].

For described Mss see I. O. Cat. pt. VII No. 3928 and A. B. Keith (I. O. Cat.) No. 7087.

Printed iu Kāvymālā, 6; German translation by R Sehmidt. Z. D. M. G. vol. 69 (1915).

दर्पदलन — Darpa dalana

No. 287 — 403. / 1887-91.

Size.— $9\frac{3}{4}$ in. by $6\frac{1}{2}$ in.

Extent.— 34 leaves ; 12 lines to a page ; 26-27 letters to a line.

Description.— Country paper ; Kāśmīrī Devanāgarī characters ; in good condition ; handwriting bold, clear, legible and uniform ; complete.

Age.— Not very old.

Author.— Kṣemendra.

Begins.—fol. 1^b

ॐ श्रीगणेशाय नमो नमः ॥

ॐ नमो भगवते वासुदेवाय नमो नमः ॥

प्रशांताशेषविघ्नाय etc. as in No. 286

fol. 5^b इति श्रीव्यासदासापराख्यक्षेमेंद्रविहिते दर्पदलने कुलविचारः प्रथमः ॥ १ ॥

Ends.—fol. 33^a

प्रशांतोतस्तृष्णा etc. up to परमदमुदारां खलु तपः ॥ as in No. 286

followed by इति श्रीदर्पदलने तपोविचारः सप्तमः ॥ ७ ॥

समाप्तं दर्पदलनम् ॥

References.— See No. 286

दशावतारचरित — Daśāvatāracarita

No. 288 — 133. / 1875-76.

Size.—$13\frac{3}{4}$ in. by 6 in.

Extent.— 67 leaves ; 12 lines to a page ; 45 letters to a line.

Description.— Smooth country paper; Kaśmiri devanagari characters; hand-writing clear, legible and uniform; folios numbered in both margins; yellow pigment occasionally used for corrections.

Age.— Saṁvat 1926.

Author.— Kṣemendra.

Begins.— folio 1[b]

ॐ नमो नारायणाय अशेषविश्ववैचित्र्यरचनारुचये नमः।
मायागहनगूढाय नानारूपाय विष्णवे॥
देवः पायादपायात्रिभुवनभुवनस्तम्भभूतः सयुष्मा-।
नायुष्मानस्य कीर्त्या प्रभवति पुरुषः स्वर्गमार्गे पवर्गे॥
मत्स्यः कूर्मो वराहः पुरुषहरिवपुर्वामनो जामदग्न्यः॥
काकुत्स्थः कंसहन्ता स च सुगतमुनिः कार्किनामा च विष्णुः।
... ...
अवतारकथायुक्त्या भक्त्या भगवतो हरेः।
श्रीव्यासदासः कुरुते क्षेमेन्द्रः सरसांस्तुतिम्॥
सजनास्थितिचित्रस्य पुण्यारण्यविहारिणः
हरिभक्तिरसासिक्ताः श्रूयतां मम सूक्तयः etc.

folio. 3[b] इति श्रीदशावतारे मत्स्यावतारः प्रथमः॥ १॥

folio. 5[a] इति श्रीव्यासदासापराख्यक्षेमेन्द्रकृते दशावतारे कुर्मावतारो द्वितीयः॥२॥

Ends— folio 66[b](67[a])

अत्वेति देवर्षिगिरं यथार्थो तथेति निश्चित्य महर्षयस्ते।
विष्णोः क्षितौ कार्किकुलावतारनिवेशिताशाः सखिनो बभुवुः॥
इत्येष विष्णुरवतारमूर्ते कथामृतास्वादविशेषभक्त्या।
श्रीव्यासदासान्यतमाभिधानक्षेमेन्द्रनाम्ना विहितस्तवाग्र्यः॥
इति श्रीव्यासदासापराख्यक्षेमेन्द्रकृते दशावतारे कर्कावतारो दशमः॥१०॥
समाप्तश्चायं दशावतारस्तवः॥
यो मत्स्यकूर्मादिविचित्ररूपाश्चर्यकारी हृदयस्थरत्नैः।

श्रीमानिनन्तः स्फुटशक्तिचक्रः श्रियेस्तुविष्णुर्विभवो दधिव (र्वः)
कश्मीरेषु बभूव सिन्धुरधिकः सिन्धोश्च निम्नाशयः।
प्राप्तस्तस्य गुणप्रकर्षयशसा पुत्रः प्रकाशेन्द्रताम् ॥
विप्रेन्द्रप्रतिपादितान्धनभूगोसङ्घकृष्णाजिनैः।
प्रख्याताशयस्य तस्य तनयः क्षेमेन्द्रनामाभवत् ॥
तेन श्रीत्रिपुरेशशैलशिखरे विश्रान्तिसन्तोषिणा।
विष्णोस्त्वल्पविलोकिताकृतसुधासंवर्धितोत्कण्ठया ॥
वाक्पुष्पैरमलैर्गुणप्रणिहितैरम्लानशोभैः स्थिरै-।
र्भक्तिव्यक्तदशावतारसरसः पूजाप्रबन्धः कृतः ॥
स्तुतिसङ्कीर्तनाद्विष्णोर्विपुलं यन्मयार्जितं।
तेनास्तु सर्व लोकानां कल्याणकुशलोदयः॥
एकाधिकेब्दे विहितश्चत्वारिंशेसकार्तिके।
राज्ये कलशभूभर्तुकश्मीरेष्वच्युतस्तवः
रसाक्षिनन्देन्दुमिते विक्रमादि संवत्सरे।
हरिस्तपो मया दृष्ट्वा पुस्तकं लिखितस्तदा ॥

References:—

Aufrecht Catalogus Catalogorum, i, 248[b], 789[b].
Printed Editions— Printed in Kāvyamālā Series, 26, 1891.
A. B. Keith :— History of Sanskrit literature, p. 136.

दशावतारचरित — Daśāvatāracarita

No. 289 — 132. 1875-76.

Size.— $7\frac{1}{5}$ in. by $5\frac{1}{2}$ in.

Extent.— 107 leaves; 15 lines to a page; 18 letters to a line.

Description.— Country paper; *Śaradā* characters; old in appearance; handwriting clear, legible and uniform; some folios are of pink colour; some folios pasted with paper slips; the Ms. is stitched in a book-form.

Age.— Appears to be fairly old.

Author.— Kṣemendra.

Begins.—

ॐ नमो नारायणाय ॥ ॐ अशेषविश्ववैचित्र्यरचनारुचये नमः ॥
मायागहनगूढाय नानारूपाय विष्णवे ॥ देवः पायादपाया
त्त्रिभुवनभवनस्तंभभूतः स युष्मान् ।
आयुष्मानस्य कीर्त्या प्रभवति पुरुषः स्वर्गमार्गेऽपवर्गे ॥
मत्स्यः कूर्मो वराहः पुरुषहरिवपुः वामनो जामदग्न्यः
काकुत्स्थः कंसहंता स च सुगतमुनिः कल्किनामा च विष्णुः ॥
आदि मत्स्यः सजयता यः श्वासोच्छ्वासितैर्जलै ।
र्गगने विदधेंभोधिं गगनं च महोदधौ ॥
तं नमस्कुर्महे कूर्मे यः कवाटमसंकटम् ।
अतीत...र्वं ब्रह्मांडमवशेष इवावहत् ॥

Ends.—

तेनश्री त्रिपुरेश शैलशिखरे विश्रांतिसंतोषिणा ।
विष्णोः स्वल्पविलोकिताकृतिसुधा संवार्धितोत्कंठया ॥
वाक्पुष्पैरमलैर्गुणप्रणिहितैरम्लानशोभैः स्थिरैः ।
भक्तिव्यक्तदशावतारसरसः पूजाप्रबंधः कृतः ॥
स्तुतिसंकीर्तनाद्विष्णोर्विपुलं यन्मयार्जितम् ।
फलं तेनास्तु लोकानां कल्याणकुशलोदयः ॥
एकाधिकेब्दे विहितः चत्वारिंशे स कार्तिके ।
राज्ये कलशभूभर्तुः कश्मीरेष्वच्युतस्तवः ॥
समाप्तोयं दशावतारः ॥ नमोच्युताय ॥

References:— See No. 288

दानकेलिचिंतामणि — Dānakelicintāmaṇi

No. 290 — 507 / 1891-95.

Size.— $10\frac{2}{5}$ in. by $4\frac{1}{3}$ in.

Extent.— 11 leaves; 11 lines to a page; 45 letters to a line.

Description.— Country paper; old in appearance; Devanāgari characters; hand-writing clear, legible and uniform; borders ruled in double black lines; occasional marginal notes.

Age.— The Ms. appears to be old.

Author.— Not mentioned. Rajendralal Mitra gives the author's name as Kriṣṇa-caitanya-candra. See Notices. No. 2528.

Subject.— Kāvya. a poem describing the dalliance between Rādhā and Kṛṣṇa.

Begins.—folio 1[b]

श्रीगांधर्वागिरिधराभ्यां नमः॥

कुर्वाणैः शतमाशिषां निजनिजप्रेयोजयायोत्सुकैः।
स्वीयैः स्वीयगणैः स्फुटं कुटलिया वाचानितुंगीकृतः॥
गव्यानां नवदानकल्पनकृते प्रौढं मिथः स्पर्द्धिनो-।
गांधर्वागिरिधारिणोर्गिरितटे केलीकलिः पातु वः॥ १॥

उद्दामनर्मरसरंगतरंगकांतं राधासरिद्गिरिधराणवसंगमोत्थं।
श्रीरूपचारुचरणाब्जरजः प्रभावादंधोपि **दाननवकेलिमणिं** चिनोमि ॥ २॥ etc.

Ends.— folio. 11[a]

दध्यादिदाननवकेलिरसाब्धिमध्ये-।
मानं नवीनयुवरत्नयुगं व्रजस्य॥
नर्मालिहृद्यमुदितद्युतिगौरनील-।
मंधोपि लुब्ध इहलोकितुमुत्सुकोस्मि॥ १७३॥

राधामाधवयोर्दानकेलिचिंतामणिं गिरौ।
लब्धमंधेन वीक्षंतां श्रीमद्रूपगणाः प्रियाः॥ १७४॥

आददानस्तृणं दंतैरिदं याचे पुनः पुनः।
श्रीमद्रूपपदांभोजे रजोहंस्यां भवे भवे॥ १७५॥

इति श्रीदानकेलिचिंतामणिनाम प्रबंधः संपूर्णः॥ यथा दृष्टं तथा लिखितं॥

References:—

1 Aufrecht Catalogus Catalogorum, i, 249[a] ; iii, 54

This work is described by Rajendralal Mitra in his "Notices of Sanskrit Mss." Vol. VII, No. 2528.

दुर्घटकाव्य

Durghaṭakāvya

No. 291

405.
1887-91.

Size.— 8 in. by 5 in.

Extent.— 8 leaves ; 9 lines to a page ; 24 letters to a line.

Description.— Thin country paper ; Devanāgarī characters ; old in appearance ; hand-writing bold, clear, legible and uniform; verse-numbers marked with red pigment.

Age.— Appears to be old.

Author.— Ascribed to Kālidāsa.

Begins— fol. 1[b]

॥ श्रीरामचंद्राय नमः ॥

लक्ष्मीवन् क्रतक्रूरस्मरणदहिन् दुः धक् क्षमः ।
पापडींलाद्दू ढोकलधीवडांछनवडी रदाजांवुदीरुचिः ॥
मंडाशाकरेखंडनो विविभुनाक्षीरावसातुल्य मां ।
सासुंदालितडिन्निभांगवसनोव्याः सेवक सारवान ॥ १ ॥ etc.

Ends.— fol. 8[a]

अर्द्धरात्रे दिनस्यार्द्धे अर्द्धचंद्रेर्द्धभास्करे ।
रावणेन हृता सीता कृष्णपक्षे सिताष्टमी ॥ ६२ ॥
स्तनमंडलमाश्रित्य नखस्य वरयोषितां ।
कदा कर्णयते गीतं नागरीवररंगराट् ॥ ६३ ॥

इति दुर्घटकाव्यं संपूर्णतामगदिति ॥

The following stanzas are written in a diffeent hand—

आभाकाशितपक्षस्य मैत्रश्रवणरेवती।
संगमेन हि भोक्तव्यं द्वादश द्वादशी हरेत् ॥ १ ॥
मैत्रस्य प्रथमं पादं द्वितीयं श्रवणस्य च।
पौष्णाया तृतीयं पादं त्यजेत् मनुरब्रवीत् ॥ २ ॥
मैत्राय पादे स्वपती च विष्णुर्वैष्णव्यमध्ये।
परिवर्त्तने च विबोधमेति नापारणं विष्णुविभागमध्येति ॥ ३ ॥

References:— see No. 292.

दुर्घटकाव्य with टीका	Durghaṭakāvya with Ṭikā
No. 292	71. 1907–15.

Size.-- $10\frac{1}{2}$ in. by $4\frac{4}{5}$ in.

Extent.— 11 leaves ; 12 lines to a page ; 45 letters to a line.

Description.— Country paper ; Devanāgari characters ; old in appearance ; handwriting clear, legible and uniform ; borders ruled in two double black lines ; left-hand edges of folios moth-eaten.

Age.— Appears to be old.

Author.— Not mentioned. It is ascribed to Kālidāsa (see I. O. Cat. Pt. VII, p. 1489.

Subject.— A highly artificial poem in praise of various deities especially Viṣṇu.

Begins.-- (Text) fol. 1^b

॥ श्रीगणेशाय नमः ॥ ॥ श्रीलक्ष्मीनृसिंहाय नमः ॥
हे लक्ष्मीवन्नृतक्रूरसूरणदहिन् etc. asin No 291

,, (Com):--हे लक्ष्मीवन् त्वं मां सेवकं अव्याः रक्षः। अवस्त्वां कृतं कोऽ पृथिव्याः

उः अवनं रक्षणं येनासौ कृत छः । पुनः किं विधस्त्वं असूः सुपते उयतेऽसौ स्ः न सूः असूः । पुनः किं विधस्त्वं ॥ रणादि हिन् रणं संग्रामं ददतीति ते रणदाः शत्रवः तान् हिनस्ति असौ रणदहिन् । इत्यर्थः । etc.

Ends.—(Text) fol. 11[a]

अर्धरात्रे दिनस्यार्धे अर्धचंद्रर्द्धभास्करे ।
रावणेन हृता सीता कृष्णपक्षे सिताष्टमी ॥ ८० ॥
किं स्याद्वर्णचतुष्टयेन वनधणैस्त्रिभिर्भूषणं ।
स्याधायेन महीत्रयेण च फलं मध्ये द्वयं प्राणदं ॥
वस्ते गोत्रतुणं(?) धास कुसुमं चांते च सप्रेक्षण ।
ये जानंति विचक्षणाः क्षितितले तेषामहं किंकरः ॥ ८१ ॥

इति दुर्घटश्लोकाः ॥ ॥ ७ ॥ नृसिंहेन काश्यां लिखिताः ॥ छ ॥

Ends.— Com.—अस्यार्थः । कृष्णपक्षे या अष्टमी तस्याः दिनस्यार्धे रावणेन सीता हृता किं लक्षणा अष्टमी । अर्धरात्रे सिता शुभ्रा । किं लक्षणे अर्धरात्रे ॥ अर्धचंद्रे ॥ किं लक्षणे अर्धचंद्रे । अर्धभास्करे । अर्धभाः करोतीति अर्धभास्करः इति ज्ञेयं ॥ ८० ॥

References.— For a described Ms. of Durghaṭa Kāvya and the comm. see I. O. Cat. Pt. VII, No. 3926.

The work is said to have been printed in Kāvyakalāpa I, pp. 136 7

दुर्घटकाव्य with टीका	Durghaṭakāvya with Ṭīkā
No. 293	709. 1886-92.

Size.— $5\frac{3}{4}$ in. by 8 in.

Extent.— 19 leaves ; 16 lines to a page ; 20-22 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; handwriting clear, legible and uniform; borders ruled in triple red lines and edges in double; red pigment occasionally used.

Age.-- Samvat 1886.

Author.-- The text is ascribed to Kālidāsa.

Begins.--fol. 1[a]

Text— ॥ श्रीगणेशाय नमः ॥

लक्ष्मीवन् कृत etc. as in No 291

,, Com:-- हे लक्ष्मीवन् त्वं मां सेवकं अव्याः रक्ष etc.

Ends.-- Text fol. (19[a])

अंधारी भयभीतिरातिकचरो लातांछडीडोकरी।
रीकीटांगरनुच्छलीवकरहीमेडारडीडांगरी॥
लातीभीतिगरीरगंडकभशोचूडोगधोभ्रकणो।
भाजीभेडभभापडभाकडहशोरीछंगयोवंदरः॥ ८१॥

इति श्रीकाल(लि)दासकविरचिते दुर्घटकाव्य संपूर्णः प्र ००० संवत् १८८६ वर्षे पोसमासे कृष्णपक्षे तिथौ पष्टचां बुद्धवासरे छ लिखितं नापूलालेन स्वपठनार्थे उपदेशकम्प शुभं भूयात् छ छ श्री श्री

Ends—Com— विना गरुडेन नितो इंद्रः तदाभभवोऽर्जुनः तद्वेषिकर्णः तद्गुरुः सूर्यः तत्पादाहतः तत्किरणसंतप्तोजनः लोकः हिमापहो वह्निस्तदामित्रं जलं तद्धरा मेघास्तैर्व्याप्तं व्योम अभिनंदति ७९.

The following stanza is in a different hand—

लांगूलचालनमधश्चरणावपातं।
भूमौ निपत्य वदनोदरदर्शनं च॥
श्वापिंडदस्य कुरुते गजपुंगवस्तु।
धीरं विलोकयति चाटुशतैश्च भुंक्ते॥ १॥

सुहृदामुप

References:— see No. 292

दुर्घटकाव्य
with
टीका

Durghaṭakāvya
with
Commentary

No. 294

708
1886-92

Size.— $10\frac{3}{5}$ in. by $4\frac{4}{5}$ in.

Extent.-- (text) 14 leaves ; 2-4 lines to a page ; 32 letters to a line.
(com.) 7-10 ,, ,, ,, 45 ,, ,, ,,

Description.— Country paper ; Devanāgarī characters ; hand-writing beautiful, clear and legible ; but not uniform ; text in the middle of folios and the comm. above and below it ; borders ruled in double red lines and edges in single daṇḍas and the colophon on fol. 13^b in red ink.

Age.-- Saṁvat 1848.

Author.-- Not mentioned. See No. 293

Begins.— (text) fol 1^b

॥ ६० ॥ ॐ नमः ॥ श्रीसार्व्वज्ञभ्यो नमः ॥
लक्ष्मीवन् कृत etc. as in No 291

,, Com—fol 1^a

॥ ६० ॥ ॐ नमः ॥
हे लक्ष्मीवन् त्वं मां सेवकं अव्याः । रक्ष । etc.

Ends.—(text) fol. 13^a

अर्द्धरात्रे दिनस्याद्धे(र्द्धे) etc. up to तेषामहं किंकरः ।
as in No. 292

,, Com-- कृष्णपक्षे या अष्टमी etc. up to अर्द्धभास्करः रिति ज्ञेयं
as in No 292

followed by इति दुर्घटश्लोकव्याख्यातं समाप्तं ॥

संवत् १८४८ वर्षे ज्येष्ठ कृष्ण १३ पूर्णा जाता लेषकपाठकयोः शुभं भवतु ॥ कल्याणमस्तु ॥ श्रीरस्तुः ॥
यादृशं पुस्तकं.....मम दोषो न दीयते ॥ छ ॥ श्री ॥

Text—fol. 14[b] वासना वासुदेवस्य वासितं भुवनत्रयं ।
सर्व्वभूतनिवासीनां वासुदेव नमोस्तुते ॥ ८५ ॥ इति ॥

Com.— हे वासनभावुक । त्वं भुवनत्रयम (मे)व । कीदृशं । सर्वभूतनिवासि इन्नंतं । असुदेव प्राणनाथ । अथवा असितं पापस्यांतय । हे ईनां श्रीणांवा निश्चितं पूरणे वा । सुदेव यतीति सुदेव अच् । यद्वा ईणां श्रीणां सर्वभुतेषु निवासी निवाशीलस्त्वं (?) सापक्षेपोगमनत्वाद्दुटः समासः । हे वासुदेव तुभ्यं नमोस्तु ॥ ८५ ॥ इति काव्यार्थः ॥ छ ॥ श्री ॥ छ ॥ श्री ॥

References—see No 292

दुर्घटकाव्य with टीका

Durghaṭakāvya with Commentary

No. 295

305.
1884-85.

Size.—9½ in. by 4¼ in.

Extent.— 24 leaves; 9 lines to a page; 22-24 letters to a line.

Description.-- Country paper; Devanāgarī characters; old and ink diffused on folios; handwriting bold, clear, legible and uniform; red pigment frequently used; folios 8, 9 and 18 missing.

Age.— Saṁvat 1817.

Author.— Not mentioned. See No. 293

Begins.-- fol. 1[b]

Text— ॥ श्रीगणेशाय नमः
लक्ष्मीवन् कृत etc as in No. 291

Com-- हे लक्ष्मीवन् त्वं मां सेवकं etc.

Ends.—fol. 27[a]

अर्धरात्रे दिनस्यार्धे etc. up to अर्धभास्करः as in No. 292 followed by तस्मिन् अर्धभास्करे ॥ १८ ॥

इति श्रीदुर्घटश्लोकव्याख्यानं समाप्तं ॥ छ ॥

शुभं भवतु ॥ कल्याणमस्तु ॥ संवत् १८१७ साके सो प्रवर्तमान् संवच्छरे दक्षिणायांगतेसरभेण वास्थव्य अदि च...ज्ञाति भ नथुसुत प्रेमानंदेन लितामीदं दुर्घटं अध्यनावस्थायां रामेस्वर जयतु ॥ छ ॥ श्री ॥ श्री ॥

References—see No. 292

दुर्घटकाव्य with टीका

Durghaṭakāvya with Commentary

No. 296

406.
1887-91.

Size.— 10$\frac{1}{8}$ in. by 5 in.

Extent.— 7 leaves ; 8 lines to a page ; 35 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; handwriting of the text, bold, and of the com. small and careless ; borders of some folios ruled in triple red lines and edges in single ; additions in margins ; text in the middle and the comm. above and below it.

Age.— Appears to be old.

Author.— Ascribed to Kālidāsa.

Begins. (Text) —fol.1^b

लक्ष्मीवन् कृत etc. as in No. 291

Begins.— (Ṭippaṇa) fol. 1^b

॥ श्रीगणेशाय नमः ॥

हे लक्ष्मीवन् त्वं मां सेवकं अव्याः रक्ष etc.

Ends.— (Text) fol. 7^a

अर्द्धरात्रे दिनस्यार्द्धे अर्द्धचंद्रेर्द्ध भास्करे ।
रावणेन हृता सीता कृष्णपक्षे सिताष्टमी ॥ ६१ ॥

स्तनमंडलमाश्रित्य नखस्य वरयोषितां ।
कदा कर्णयते गीतं नागरीवररंगराट् ॥ ६४ ॥

इति दुर्घटकाव्यं संपूर्णं

लक्ष्मीस्ते पंकजाक्षी निवसतु भवने भारतीकंठदेशे ।
वर्द्धंतां बंधुवर्गा प्रबलरिपुगणायांतु पातालमूले ॥
देशे देशे च कीर्त्ति भवतु भवतां कुंदपूर्णेंदु शुभ्रा ।
जीवत्वं पुत्रपौत्री सकलगुणयुतै स्वसिते नित्यमास्तां ॥ १ ॥

References—see No. 292

दुर्घटकाव्य with टीका

Durghaṭakāvya with Commentary

No. 297

509.
1891-95.

Size.— 8 in. by 5 in.

Extent.— 27 leaves; 11 lines to a page; 25 letters to a line.

Description.— Country paper; Devanāgarī characters; whitish in appearance; handwriting beautiful, legible and uniform; borders ruled in double red lines.

Age.— Śaka 1736.

Author.— Not mentioned- ascribed to Kālidāsa.

Begins.—fol. 1[b]

Text— ॥ श्रीगणेशाय नमः ॥
लक्ष्मीवन् कृत etc. as in No. 291

Com— हे लक्ष्मीवन् त्वं मां सेवकं अव्याः । etc.

Ends.—fol. 26[b]

Text— यावत्तोयधरा धरा धरधरा धारा धरा भूधरा ।
यावच्चारुचचारु चारु चमरं चामीकरं चामरं ॥

यावद्रावणरामरामरमणं रामायणं श्रुयते ।
तावद्भोगविभोग भोग भोग भवनं भोगायते नित्यशः ॥ ८६ ॥

fol--27ᵃ

Com — रावणस्येति रावणग्रहणमन्वार्थकमिष वेत्सत्यं केवल रामस्य रामायण-रमणीयत्वे प्रयोजकत्वेपि रावणसंबंधि संग्रामादि कथाया अपि रामायण-रमणीयत्वं प्रयोजकत्वाद्रावणस्यापि प्रयोजकत्वं । किं च रमणरामरामरमणं(ण) मिति पाठे रामणी रामा जानकी यस्यासौ रामणरामः सचासौ रामश्च रामण-रामस्तेन रमणमित्यर्थः । इति वा ॥

॥ इति श्रीदुर्घटाख्यंकाव्यं संपूर्णं ॥ ॥ छ

॥ श्रीकृष्णर्पणमस्तु ॥ ॥ शुभं भवतु ॥ छ ॥ छ ॥

शके १७३६ भावनाब्दे अधीक भाद्रपद कृष्ण ४ शनौ तद्दिने संपूर्ण ग्रंथ लिख्यते ॥ ग्रंथ संख्या हुमारी श्लोक ४५० ॥

References—see No. 292

दुर्घटकाव्य with टीका

Durghaṭakāvya with Commentary

No. 298

361.
1884-87

Size.— 11½ in. by 5½ in.

Extent.— 12 leaves ; 11 lines to a page ; 40 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting very beautiful, clear, and legible ; borders ruled in triple and edges in double red lines ; certain words, daṇḍas and the colophon written in red ink ; complete.

Age.— Saṁvat 1861 ; Śaka 1726.

Author.— Not mentioned.

Begins—fol 1[b]

Text-- ॥ ६० ॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥
लक्ष्मीवन् कृत कर etc. as in No. 291

com.— हे लक्ष्मीवन् त्वं मां सेवकं अव्याः etc.

Ends.-- (text) fol. 11[b]

अर्द्धरात्रि दिनस्यार्द्धे etc. up to तेषामहं किंकरः ॥ ७५ ॥
as in No. 292

followed by खाटपाटवृषभाटनगारी डाभडाभकर हाटहुवाटा ।
एषा आशुतवभूमिपरुष्टा ग्रामसीममहितां प्रदिशंतु ॥७६॥

com-- अस्यश्लोकस्यार्थे शिवो वेति ॥१ ॥ इति श्रीदुर्घटश्लोकव्याख्या संपूर्णम् ॥ १ ॥ Then followed by :--

स्तनमंडलमासाद्य नखस्य वरयोषितां ।
कदा कर्णयते गानं रमया सह रंगराट् ॥ १ ॥
युगमुखाशनशंकरतेजसे त्रिमुखमिश्रघनक्षयहेतवे ।
कचतृतीयमुखायमपूर्वजाग्रिमहरायतपान्तविसर्ज्जनम् ॥ २ ॥
कःखे भाति हतो निशाचरपतिः केनांबुधावद्रवत् ।
कः कीदृक् तरुणीविलासगमनं किं कुर्वते सज्जनाः ॥
पत्रं किं नृपतेः किमर्जुनधनुः को रामरामापहृत् ।
मत्प्रश्नोत्तरमध्यमाक्षरमिदं किं स्युस्तदाशीर्व्वचः ॥ ३ ॥
संवत् १८६१ ॥ शाके १७२६ ॥ मिती पोसमासे शुक्लपक्षे तिथौ प्रतिपदायां भौमवासरान्वितायां । लिपीकृतं शिवनाथेन ॥ पचेवरमध्ये ॥
श्रीरस्तु शुभं भवतु । स्वपठनार्थे ॥ १ ॥

References.— See No. 292.

दुर्घटकाव्य with टीका

Durghaṭakāvya with Commentary

No. 299

14
1874–75.

Size.— $10\frac{3}{5}$ in. by $5\frac{1}{2}$ in.

Extent.— 20 leaves ; 12 lines to a page ; 30-32 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting bold, clear and legible ; borders and edges ruled in double pink lines ; verse-numbers marked with red pigment.

Age.— Śaka 1729.

Author.— Not mentiond.

Begins.—fol. 1^b

Text— ॥ श्रीगणेशाय नमः ॥

हृदि लग्नेन बाणेन यन्मंदोपि पदक्रमः ।
असत्कविकुरंगाणां चापलं तत्र कारणं ॥ १ ॥
खाटी छाशीपलेह पापडवडीष्यारोड भाजीगणो ।
यद्भक्तो निमिषीव वाकुलचणा ध्यायंति यां योगिनः ॥
कालाभीलकराल भूखलमहा दैत्येंद्रमंथार्थिनी ।
सासासूयरसातवायहृतये स्तात्कर्णमोटी चिरं ॥ १ ॥

Com-- सा कर्णमोटी चामुंडा तवाय हृतये हरणाय स्तादस्तु । का सा । सासूयरसा । असूया कोपः तस्य रसः तेन सह वर्त्तमाना । तथा रसश्चासूय रसेति । etc.

Ends.-- fol. 20^b

Text-- नीचेषु जावनी वाणी काकश्च शुभदो भवेत् ।
शंभोरारावणं किं किं भजंते व्याधयो नरं ॥ ९८ ॥

com-- अ० ॥ अवेलाभोजिनं । नीचेषु काजावनी वाणि । अद्ये । वयोरभेदः । काकस्याः शुभदो भवेत् । लाभ । शंभोः आवरणं किं । अजीनं । व्याधयः किं भजंते । अवेलाभोजिनं ॥ ९८ ॥ ॥

इति श्रीदुर्घटनामायं ग्रंथः समाप्तः ॥ श्रीरस्तु ॥

अदृष्टदोषान् मतिविभ्रमाच्च यत्किंचिदूनं लिखितं मया च ।
तत्सर्वमार्यैः परिशोधनीयं दोषो न देयः खलु ले(ख)कस्य ॥

श्रीरामसमर्थ ॥ शके १७२९ बहुधान्यनाम संवत्सरे चैत्र शुद्ध ९ गुरुवासरे समाप्तः ॥ इदं पुस्तकं कविश्वरोपनामक माधवसुत केशवेन लिखितं स्थिति वीरक्षेत्रे ॥ श्रीरामकृष्णार्पणमस्तु ॥

The fly-leaf contains the following endorsement:—

॥ कवि (वी) श्वरोपनामक माधवसुत केशवस्येदं पुस्तकं ॥
अथ दुर्घटकाव्य प्रारंभ ॥ पत्र २० ॥

दुर्घटकाव्य with टीका

Durghaṭakāvya with Commentary

No. 300

50(i).
1871-72.

Size.—$12\frac{3}{5}$ in. by $6\frac{3}{5}$ in.

Extent.— foll. 1-5[a] leaves; 2-3 lines to a page; 30-32 letters to a line. (text)
8-9 ,, ,, ,, 40 ,, ,, ,, ,, (com.)

Description.— Country paper; Devanāgarī characters; handwriting beautiful, bold and legible; borders ruled in triple red lines and edges in single; verse-numbers and daṇḍas marked with red pigment; text in the middle and the comm. above and below it; the fly-leaf contains a design and the names of the works viz. दुर्घटकाव्य and विद्वद्विनोदकाव्य.

The Ms. contains only six verses.

Age.— Does not appear to be very old.

Author.— Not mentioned.

Begins.— (Text) fol. 1[b]

वीरोद्भूधक् त्रिफस्वर्विहृदारिपरकोहः सृगृक्षेइ जांङ्घः ।
इगाग्य स्त्रीदृगो वृदेकद्विजरुरुपरयाजांगजोऽघोघहाभीः ॥
वाताद्धारो विषप्साः कलसदजसरित् सस्वदः कंधिजादो ।
भादोनाराससं घाबनतपदकरुटसोऽ···कांद्धोहरिद्धः ॥ १ ॥ etc.

„ —(Com.) fol. 1[b]

॥ श्रीगणेशाय नमः ॥ ॥ श्रीराधावल्लभाय नमः ॥

॥ सः हरिद्वः वः युष्मान् अव्यकात् पांतु रक्षतु अकरक्षणे हरिद्वः हरितं दिशं वसतीति हरिद्वः वस्निवासे हरिद्वः इति किं दिगंबरः नग्न इत्यर्थः ॥ etc.

Ends.— (Text) fol. 5[a]

गोभ्राव: किमयं गवाश्रयगते किं सुभ्रु गां वीक्षसे ।
गोमध्ये चरणेन किं लिखसि गां गोस्त्रीनिभेदेहि गां ॥
गावो यांति गृहेषु वासरमणेर्गावश्च दूरं गताः ।
गावस्त्वद्विरहे ममासुहरणा एरेहि यामो वयं ॥ ६ ॥
इति दुर्घटकाव्य समाप्ताः ॥ ॥

„ —(Com) fol. 5[a]

किं लिखसि देवरमणी निभेगां वाणीरोहि गावः वृषभादिरूपाः वने या संगृहीत्वा संध्यागृहेषु यांति वासरमणेः सूर्यस्य गावः किरणाः दुरं गताः सूर्योस्तं यांति इत्यर्थः हे स्त्री त्वद्विरहे...कामः अस्य गावो बाणाः मम असु-हरणाः असुरप्राणान् हरंतीति असुरहरणाः त्वं एएहि आगच्छ वयं व्रजामः ॥ ॥ ६ ॥ इति दुर्घटकाव्यव्याख्या समाप्ताः ॥

॥ श्रीहरिर्जयतु ॥ ॥ श्री ॥ छ ॥

दुर्घटकाव्य with टीका

Durghaṭakāvya with Commentary

No. 301

440.
1884-87.

Size.— 12 in. by 4 in.

Extent.— 7 leaves ; 17 lines to a page ; 65 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; handwriting very small and not quite legible ; red pigment used ; folios present a dirty appearance due to spots ; complete.

Age.— A modern copy.

Author.— Not mentioned - ascribed to Kālidāsa.

Begins.— (text) fol. 1[a]

॥ श्रीगणेशाय नमः ॥ श्रीत्रिपुरसुंदर्यै नमः ॥

लक्ष्मीवन् कृत etc. as in No 291

Begins.-- (Com) fol. 1[a]

हे लक्ष्मीवन् त्वं मां सेवकं अख्याः । रक्षः अवः कथंभूतस्त्वं कृतक्रः कृतं कोः पृथिव्याः उः अवनं रक्षणं येनासौ कृतक्रः । etc.

Ends.--fol 7[b]

निष्कामतया कामानुष्ठानपरेपरे कर्म न लिप्यते । कर्मफलं न भवतीत्यर्थः । तस्माच्छिवाख्यौ खंडानंदानुभरामत्सेनरमणमित्यर्थः । इति दुर्घटकाव्यं संपूर्णमस्तु ॥ छ ॥

शके १०७५ (?) शोभकृन्नाम संवत्सरे मार्गशीर्ष मासे तद्दिने कळंकरोपन्नाम्नः गोपाळभट्टात्मज मल्लारेणालिखितं ॥ श्रीजगदंबार्पणमस्तु ॥ ॥ जगदंबः ॥ जगदंब ॥ जगदंब ॥

वसंते वासंते द्रुमकुसुमसौरभ्यलहरी ।
भ्रमद्भृंगीरंगरचितमुखलालासमुखरैः ॥
प्रिया...त्वानाथात्स्फुटितहृदयो मन्मथवशात् ।
अहाहाहाहारिहारिहारिसृतः कोपि पथिकः ॥ १ ॥
गंतव्यं नगरपथे द्रष्टव्या कनकभूषिता रामाः ॥
यद्यपि न भवति सुरतं नयनसुखं को निवारयति ॥ २ ॥
गंतव्यं राजपथे द्रष्टव्या राजपूजिता लोकाः ।
यद्यपि न भवंत्यर्था तथाप्यनर्था विलीयंते ॥ ३ ॥
सर्वेषामेष रत्नानां स्त्रीरत्नं तु मनोरमं ।
तदर्थधनामिच्छंति तात्यक्त्वा तु धनेन किं ॥ ४ ॥
स्वर्णवर्णवनितावरांगफेरेजुरुस्थिततनूरुहांकुराः ॥
तर्पणाय मदनस्य वेधसा स्वर्णशुतिनिहितास्तिला इव ॥ ५ ॥
निर्गुणोपि वरं वंशो रक्षायै सुनिदेहवत् ।
सगुणोप्यर्धवंशस्तु जीवघाताय केवलं ॥ ६ ॥
इति दुर्घटकाव्यं संपूर्णं ॥ छ ॥ जगदंब ॥

References.-- See No 292

दुर्घटकाव्य with टीका

Durghaṭakāvya with Ṭikā

No. 302

448 (i).
1895-1902.

Size.—$7\frac{2}{5}$ in. by $10\frac{3}{4}$ in.

Extent.— 1-13 leaves ; 40-45 lines to a page ; 32 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; hand-writing very small and careless, but some what legible ; borders of some folios ruled in double red lines ; folios slightly worn out.

The Ms. contains the following works:—

(i) दुर्घटकाव्य with टीका foll. 1—13^a
(ii) संकीर्ण श्लोकाः ,, 13^a-14^b
(iii) दण्डक ,, 15^a-17^b
(iv) जयति ,, 17^a-17^b
(v) प्रस्तावरत्नाकर ,, 17^b-18.

Age.— Appears to be old.

Author.— Not mentioned.

Subject.— The Ms contains the same verses as are found in Ms No. 292 ; but it contains many more verses in addition.

Begins.--fol. 1^a

लक्ष्मीवन् कृत etc. as in No 291

॥ श्रीकृष्णाय नमः हे लक्ष्मीवन् त्वं मां सेवकं अव्याः रक्षः कथं भूतस्त्वं कृतकः कृतः को पृथिव्याः उः अवनं येनासौ कृतकः etc.

Ends.— fol 13

कदा हि समये ग्रोष्मेऽदुःखात्कंपवनेरिति कवे दावाग्नितप्ता पापनुकंपामिषादिव टी. कं ददाति कदा मघा कवे पृथिव्यै कंजलंऽदुः

References:—See No 292

देवीशतक with टीका

Devīśataka with Ṭīkā

No. 303

137.
1875-76.

Size.— 13¾ in. by 6 in.

Extent.— 25 leaves; 12 lines to a page; 40-42 letters to a line.

Description.— Country paper; Kāśmīrī Devanāgarī characters; handwriting clear, legible and uniform; red and yellow pigment used; चक्रबन्धाs are to be seen on some folios.

Age.— Does not appear to be very old.

Authot (of the text)— Ānandavardhana.

„ „ „ comm.)— Kayyaṭa.

Subject.— Verses in praise of Devī.

Begins:—Text अनंतमहिमव्याप्तिर्विश्वां वेधा न वेद याम्
या च मातेव भजते प्रणते मानवे दयाम् ॥ १ ॥ etc.

Begins.—(Com) fol. 1ᵇ

॥ ॐ नमो गुरवे सरस्वती रूपाय ॥
नमोस्तु वागधीशाय हयग्रीवाय विष्णवे ।
कौमोदकीचक्रशङ्खकमलाङ्कितपाणये ॥
प्रणम्य परमं धाम यत्प्रसादाज्वलन्त्यमी ।
महामोहमहिम्नार्ता रवितारादिपानलाः ॥
संचिक्षिप्सुरलं स्वबुद्धिरचितैः पर्यायशब्दैर्वृथा-।
ट्टीकां वल्लभदेव उत्तममतिः स्मृत्यै भवानीस्तुतौ ॥
पर्यायैः क्रियया समंकविकृतात्पाठान्पठन्कश्यट-।
श्चंद्रादित्यतनूज इत्थमकरोत्तस्यैव नप्तानवाम् ॥
आनंदवर्धनकविप्रवरप्रणीत काव्ये किमल्पमतिना क्रियते मयैवम् ।
किं वा पिपीलककुलानि न संश्रयन्ते मत्तेभदंतपदपंक्ति ममेयसाराम् ॥
etc.

Ends.—(Text) fol. 23[b]

येनानंदकथायां त्रिदशानंदे च ल (ला) लिता वाणी ।
तेनासुदुष्करमेतत्स्तोत्रं देव्याः कृतं भक्त्या ॥

Ends.—(Com) fol. 25[a]

वल्लुभदेवायनितश्चंद्रादित्यादवाप्यजन्मे माम् ।
कय्यटनामा रचयद्विवृतिं देवीशतकस्तोत्रे ॥
एवं वागीश्वर्याः स्वरूपमाख्याय यन्मया व्याप्तम् ।
पुण्यं तेन जगत्स्यात्प्रतिजन्माव्याप्तपरबोधम् ॥
वसुमुनिगगनोदधि समकाले याते कलेस्तथा लोके ।
द्वापंचाशे वर्षे रचितेयं भीमगुप्तनृपे ॥
कर्मस्थानोदिता साहिमकरशशिभद्वह्निचक्रान्तरस्थ-।
क्षेत्रज्ञोद्बोधनाय प्रलयरविकराग्रामतेजो विरामा ॥
नित्यं मन्दालिघोषा कचटतपयशालापिनी मध्यवाहा ।
बालाग्रात्सूक्ष्मरूपा त्रिभुवनजननी पातु वागीश्वरी वः ॥
एकायनस्याच्युततुल्यमूर्तेराचार्यनारायणगर्तनाम्नः ।
शिष्येण दृष्टेयमनंतशास्त्रवेत्तुः सदृक्षेण च कय्यटेन ॥

इति नोणात्मजानंदवर्धनविरचित देवीशतकस्तोत्र सटीकं समाप्तम् शुभम् ॥

References.— 1 Mss Aufrecht's Catalogus Catalogorum—i, 262[a]. (text); ii, 56[a].

2 Printed Editions.— Printed in Kāvyamālā 9, pp. 1-31.

नलायन Nalāyana

No. 304 456. 1899-1915.

Size.— 10 in. by $3\frac{4}{5}$ in.

Extent.— 59 leaves; 11 lines to a page; 32 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters with पृष्टमात्रास; handwriting clear, legible and uniform; borders ruled in thick red lines; big red dots in

the centre and in the margins of folios; incomplete; slightly moth-eaten.

Age.— Appears to be old.

Author.— Not mentioned.

Subject.— A poem describing the life of Nala.

Begins.--folio. 1ª

ए० ॥ ॐ नमः श्रीसर्वज्ञाय ॥
जयति जयति देवः केवल ज्ञानमूर्त्ति- ।
र्म्मदमदन विजेता शाश्वतो वीतरागः ॥
जयति कुमुदशुभ्रा भारतीभूरिभावा ।
जयति कविकुलानां कोमलो वाक् प्रपंचः ॥ १ ।
दुरितदलनसज्जः सज्जनोद्धारधीरो ।
धनवितरणवीरो धर्मविश्रामशाखी ॥
जयति जगति नित्यं निश्चलो निःकलंकः ।
सकलकलुषहारी लोकपालः कुबेरः ॥ २ ॥ etc.

folio 5ª इति नलायने प्रथमस्कंधे प्रथमः सर्गः

folio 9ᵇ इति प्रथमस्कंधे नलायने द्वितीयः सर्गः ॥

Ends. (abruptly)—folio 59ᵇ

ममाप्यनुमतं तावत् प्रियतां पाकशासनः ।
कोऽन्यः किल सहस्राक्षो त्वां वीक्षितुमपि क्षमः ॥ १३ ॥
विश्वै.....

नलोदयकाव्य Nalodayakāvya

No. 305 349. / 1892-95.

Size.— $10\frac{3}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 14 leaves; 9-11 lines to a page; 30 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; handwriting clear and legible; borders ruled

in double black lines; yellow pigment occasionally used left hand edges slightly worm-eaten; पृष्ठमात्रास occasionally used.

Age.— Samvat 1669.

Author.— Not mentioned. The work is attributed to some Kālidāsa

Begins.—folio. 1[a]

॥ ६० ॥ श्रीसारदाय नमः ॥

हृदय सदायादवतः पापाटव्या दुरासदायादवतः।
अरिसमुदायादवतस्त्रिजगन्मदायादवतः ॥ १ ॥
योऽजनि ना गोपीतश्चवारयोः बलुवांगनागोपीतः।
भूर्येनागोपीतः कंसायो द्वेषमेव नीगपीतः ॥ २ ॥ etc.

folio. 4[b] इति श्रीनलोदये माहाकाव्ये प्रथम आश्वासः ॥ १ ॥

folio. 8[b] इति etc.....द्वितीय आश्वासः ॥ २ ॥

folio. 11[b] इति etc.....तृतीय आश्वासः ॥ ३ ॥

Ends.—folio 14[b]

अरिसंहतिरस्य वनेषु शुचां। पदमापदमापदमापदमा ॥
सुखदं च यथैव जनाय हरिं। यतमायतमायतमायतमा ॥ ४५ ॥
नलेन पूर्यतायतायताय चिरेय सा।
सदायसुन्महाहामहास्त संपदं ॥ ४६ ॥

इति श्रीनलोदये यमककाव्ये-चतुर्थ आश्वासः ॥

नलोदयः संपूर्णमजनि ॥ श्रीस्तात् साधुजनैः वाच्यमाना चिरं नंदतु ॥

संवत् १६६९ वर्षे शुक्लपक्षे मार्गशिरमासे पूर्णिमायां तिथौ स्थ श्रीस्तंभतीर्थमध्ये आलेखि ॥ सु० विजयशेखरेणायम पठेत् ॥

References.—

1 Aufrecht's Catalogus Catalogorum— Pt. i, page 280[a] ii, 60[b], 206[b]; iii, 60[b].

2 Winternitz - History of Indian Literature Vol. III, p. 64

3 Mss described— The work is described in the following catalogues— (1) Mad. Cat. Vol. XX, Nos 11843-45. (2) A. S. B. Cat. Vol. VII, Nos. 5015-17; etc.

नलोदय Nalodaya

No. 306 185. 1879-80.

Size.— $9\frac{4}{5}$ in. by $3\frac{3}{4}$ in.

Extent.— 20 leaves ; 6 lines to a page ; 36 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing clear and legible ; borders ruled in double black lines and pink colour ; red pigment used for verse-numbers and colophons and black ink for corrections ; slightly moth-eaten.

Contains a ṭippaṇi for the 1st ullāsa and marginal notes for the rest. The work is attributed to रविदेव.

Age.— The Ms. appears to be old.

Author.— Ravideva.

Begins.—folio. 1[b]

॥ श्रीगणेशाय नमः ॥

हृदय सदा etc..... as in No. 305

folio 5[b] इति नलोदये प्रथम उल्लासः ।

folio. 10[b] इति श्रीभट्टनारायणनरविदेवविरचिते नलोदय-

नाम्नि महाकाव्ये नलराज्यं नाम द्वितीय उल्लासः ॥ श्रीः ॥

इति etc.... ... ... तृतीयोल्लासः ॥ श्रीः ॥

Ends.—folio. 20[b]

अरिसंहतिरस्य etc.... up to संपदं as in No. 305

followed by इति श्रीभट्टनारायणसुतरविदेवविरचिते नलोदयनाम्नि महाकाव्ये नलराज्यप्राप्ति चतुर्थ उल्लासः ॥ छ ॥ ॥ छ ॥

श्रीकृष्णाय नमः ॥ छ ॥ लेखकपाठकयोर्गणपतिं कल्याणं ददातु ॥ छ ॥ वासुदेवाय नमः ॥ श्रीरस्तु ॥ छ ॥ श्री ॥ सरस्वत्यै नमः ॥ गुरुभ्यो नमः परमगुरुभ्यो नमः ॥

References.— see No. 305

नलोदय Nalodaya

No. 307 409. 1887-91.

Size.— $10\frac{1}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 16 leaves ; 7-10 lines to a page ; 32 letters to a line.

Description.— Country paper ; old and discoloured ; Devanāgarī characters ; hand-writing clear and legible but not uniform ; borders ruled in double black lines ; yellow pigment used for corrections ; folios numbered in both margins ; marginal and other notes upto first 50 stanzas of the 1st Ullāsa.

The work is ascribed to three writers viz. रविदेव, कालिदास and केशवादित्य.

Age.— Saṁvat 1698.

Author.— Kālidāsa.

Begins.—folio. 1[b]

॥ श्रीगुरवे नमः ॥
हृदय सदा etc..... as in No. 305

folio 6[a] इति श्रीनलोदयाख्ये महाकाव्ये कवि श्रीरविदेवकृते प्रथमोल्लासः ॥

folio 10[b] इति श्रीनलोदयकाव्ये कालिदासकृतौ वसंतवर्णनो नाम द्वितीय सर्ग्गः ॥ २ ॥

folio 13[b] इति श्रीकालिदासकृतौ नलोदये काव्ये त्रितीयः सर्ग्गः ॥ ३ ॥

Ends.—folio 16[a]

अरिसंहतिरस्य etc..... up to संपदं ॥ ४७ ॥ as in No. 305
followed by—इति श्रीकेशवादित्यविरचिते नलोदयकाव्ये चतुर्थः सर्ग्गः ॥४॥

संवत् १६९८ वर्षे वैशाख शुदि २ भृगु दिने लिषितं नलोदयकाव्यं मिश्रभूधरेणात्मजपठनार्थं ॥ शुभं भवतु ॥

References.— See No. 305

नलोदय Nalodaya

No. 308 511. 1891-95.

Size.— $9\frac{4}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 17 leaves; 8 lines to a page; 32 letters to a line.

Description.— Country paper; old and brittle; Devanāgarī characters; hand-writing clear and legible; borders ruled in double black lines with red pigment between them; red pigment also used for verse-numbers and colophons; left-hand edges slightly damaged; for 1 missing.

Age.— Saṁvat 1618; Śaka 1483.

Author.— Kālidāsa.

Begins.— folio. 2[a]

यस्सेनानावारिप्रकरनदीः शरमयं धुनाना वारि ।
अतरन्ना नावारि । व्यसनैर्यद्भुवि वनं च नानावारि ६ etc.

folio 6[a] इति नलोदये यमककाव्ये प्रथमः अश्वसः ॥ छ ॥

folio 11[a] इति etc..... द्वितीयः आश्वासः समाप्तः ॥

folio 15[a] इति etc..... तृतीय आश्वासः ॥ छ ॥

Ends.—folio 18[b]

अरिसंहतिरस्य etc..... up to संपदं ॥ ४६ ॥ as in No. 305 followed by इति नलोदये चतुर्थः आश्वासः ॥

इति श्रीकालिदासविरचितं नलोद(य)नामकाव्यं संपूर्णं ॥

शुभं भवतु संवत् १६१८ शाके १४८३ वैशाख शुदि १५ शनौ..... तीर्थे जोसीश्रीरतराजीसुत श्रीकृष्णेन लषितं ॥ आत्मपठनार्थे ॥

References:— See No. 305

नलोदयकाव्य Nalodayakāvya

No. 309 311.
1884-86.

Size.— 10 in. by 5 in.

Extent.— 36 leaves; 7-8 lines to a page; 18 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing bold but not quite legible; carelessly written; borders ruled in double black lines; occasional marginal notes; red pigment used for verse-numbers; fol. no. 24 repeated; fol. 24 (2)^{b} blank.

The Ms. was written by one Harināṭha at Karṇa-kuṇḍalpura.

Age.—Saṁvat 1691.

Author.— Keśavāditya; Kālidāsa.

Begins.—folio. 1^{b}

॥ ६७ ।; स्वस्ति श्रीकृष्णो विजयतां ॥

राम हृदय सदा etc.....as in No. 305

folio 8^{a} इति श्रीकालिदासकृतौ नलोदये महाकाव्ये प्रथम सर्गः ॥१॥

folio 18^{b} इति etc..... द्वितीयः सर्ग्गः ॥ २ ॥

folio 26^{b} इति etc..... तृतीयः सर्ग्गः ॥ ३ ॥

Ends.—folio. 35^{b}

अरिसंहतिरस्य etc..... up to संपदं ॥ ४८ ॥ as is No. 305

followed by इति श्रीकेशवादित्यविरचिते नलोदये चतुर्थो छ सर्गः। संवत् संवत् १६९१ वर्षे वैशाषमासे कृष्णपक्षे तिथौ द्वितीयायां गीष्यति वासरान्वितायां सायं पूर्णीकृतमयं नलोदयमलेखि। मिश्रश्रीमन्मनोहरात्मजेन हरिनाथाभिधेन कर्णकुंडलपुरे आत्मपठनार्थे शुभमस्तु ॥

References—See No. 305

नलोदयकाव्य
with
टीका यमकबोधिनी

Nalodayakāvya
with
Commentary Yamakabodhini

No. 310

411.
1887-91.

Size.— $12\frac{4}{5}$ in. by 6 in. (foll. 1-19).

,, ,, in. by $5\frac{1}{2}$ in. (foll. 20-36).

Extent.— 36 leaves ; 2-3 lines to a page ; 36 letters to a line. (Text)
10-12 ,, ,, ,, ,, 50 ,, ,, ,, ,, (Com.)

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing of the text bold and that of the comm. very small but clear and legible ; text in the middle with the comm. above and below it ; folios numbered in both margins.

Age.— Saṁvat 1852 ; Śaka 1717.

Author of the text.— Ravideva.

,, ,, ,, Comm.— Rāmarṣi, son of Vṛddhavyāsa, composed in 1608. Cf. Auf. i, 280.

Begins.— folio. 1[b]

Text — हृदय सदा etc.....as in No. 305

॥ श्रीरामचंद्राय नमः ॥

Com.— प्रणम्य परमात्मानं यदुनंदनमादितः ।
नालोदयी मया टीका यथामति वितन्यते ॥ १ ॥
बुध्वा बुधान् यमकसागरपारकामान् ।
श्रीशंकरैकशरणः करुणार्द्रचेता ॥
टीकां सुपोतशद्रशीं हि नलोदयस्य ।
प्रज्ञाप्रियामलघुरामऋषि (:) करोति ॥ २ ॥
वृद्धव्याससरित्पतिर्गुणगणानर्थैकरत्नाकरः ।
प्रख्यातो जनकोस्ति यस्य सरसी काव्यज्ञमौलिर्द्युतिः ॥
श्रीमद्रामऋषिर्महामणिरभूत श्रीगोमतिसंभवो ।
येनैषा क्रियते नलोदयग्रहांज्ञानांधकारः कृति ॥ ३ ॥

पीत्वाघ्राय पयः पदाकुरसृतस्पर्द्धि प्रकोपी यथा।
तादृग्नो वमति स्वरूपममलं तत्याससं..... ।।
...न्य च सत्कृतिं सुगुणिना संसिद्धिमद्रोहकृत।
जानन्नय्यतिनिर्मली न वदति प्रायस्तथा दुर्जन ॥ ४ ॥
इह ध्रुवं यद्यपि सज्जनानां नाधिक्यमस्त्यजदृगंजनानां।
तथाप्यहं तद्विनयानुवर्त्ती करोमि टीकां प्रणयप्रवर्तं ॥ ५ ॥

कवि रघुनाऽत्र(त्रे)प्सितग्रंथनिर्विघ्नपरिसमाप्तिकामो यथेष्टं निर्दिष्टेष्टदेवतास्मरणलक्षणं मंगलमाचरति: हे हृदय मानस त्वं सदा सर्वदा यादवतः श्रीकृष्णात् त्रिजग त्रैलोक्यं मा गा मा गच्छ श्रीकृष्णं विहाय त्रैलोक्यसुखार्थं अन्यत्साधनं मा कुरुष्वेत्यर्थ etc.....

folio. 13[a] इति श्रीमद्रामऋषिविरचितायां यमकबोधिन्यां रविदेवविरचिता महाकाव्य नलोदयटीकायां दमयंतीस्वयंवरो नाम प्रथम आश्वास ॥ १ ॥

folio 22[a] इति etc. .....वसंतक्रीडावर्णनो नाम द्वितीय आश्वासः ॥२॥

folio 29[b] इति etc. .....दमयंत्याविलापो नाम तृतीय आश्वासः ॥ ३ ॥

Ends.—folio 35[b] (36[a])

Text अरिसंहतिरस्य etc.... up to संपदं ४७ as in No. 305

followed by इति श्रीश्रीरविदेवविरचिते महा(का)ख्ये नलोदये नलराज्यप्राप्तिनाम चतुर्थः आश्वासः ४ शुभं भुयात् ॥ श्री ॥

(Com) अयं नलः संपदं लक्ष्मीं अहास्त अगच्छत किंलक्षणोयं सदा उन्महाः उत्कृष्टतेजाः किं लक्षणं संपदं महा महां महान्मह उत्सवो यस्या सा तथा तां पुनर्नगरीमेत्य नलो लक्ष्मीं प्राप्तवानित्यर्थः ॥ ४७ ॥

श्रीडिंडवाणनगरे किलवत्स्यगोत्रो व्यासो बभूव फलहः फलदोनुगानां।
प्रीत्या सदा पुरजनैः परिपूज्यमानः शुभ्रैर्यशोभिरमलीकृतचंद्रबिंबः ॥१॥
बभूव भूमौ भवभूतितुल्यः श्रीकेल्हणोनाम तदात्मजश्च।
येन स्वबुद्धेः किल वैभवेन वशीकृता राजसभासु सर्वैः ॥ २ ॥
तस्यात्मजः सर्वगुणैकधामा श्रीरंगनामा क्षितिदेववर्यः।
बभूव भूया लकलध्वमानः सित्पतितम्नानविधूतपापः ॥ ३ ॥
तस्यात्मजौ कीर्त्तिकरौ पितृणां कौजूस्तथा वृद्ध इति प्रसिद्धौ।
गोविंदपादांबुजसेवनोत्सुकौ वेदागमाचारपरावभूतां ॥ ४ ॥
श्रीभागवतभावार्थव्याख्याने श्रीधरोय(पमः)मवृद्धः।
व्यासो भवद्धद्धमाननीयो दिने दिने ॥ ५ ॥

वैश्वदेव विशुद्धात्मा तीर्थाटनपरायण ।
वृद्धव्यासो भवद्योग्यो लोककल्याणकारकः ॥ ६ ॥
तस्यात्मजास्त्रयोनातानिंवादित्यो विदांवरः ।
तथा रामऋषि(:)धीमान् हरिवंशस्तथावरः ॥ ७ ॥
तेषां माता महाभागा नामतो गोमती बभौ ।
हेमदानपरानित्यं विप्राणां भोजनप्रदाः ॥ ८ ॥
चक्रे रामऋषिर्विद्वान् वृद्धव्यासात्मनः सुधीः ।
नालोदयीमिमां टीकां शुद्धां यमकबोधिनिं ॥ ९ ॥
टीकांविना बुधाख्यां कृत्वा नालोदयीं इमां ।
व्याख्याने यमकानां तु श्रमं ज्ञास्यथ मामकं ॥ १० ॥
यद्विस्मृतं भ्रांतिवशात् कृतं वा विचार्य तन्मे सुधियो महांताः ।
कृपालवः कीर्तिकृतः कवीना परोपकाराः किल शोधयंतु ॥ ११ ॥
केतकानां सुपुष्पाणां बुधाः कंटकिनामपि ।
सौरभं न(त्य)जंत्येव महांतो हि गुणग्रहाः ॥ १२ ॥
वेदांगरसचंद्राब्देवर्षे मासे तु माधवे ।
शुक्लपक्षे तु सप्तम्यां गुरो पुष्ये तथोडुनि ॥ १३ ॥
सुरत्राणे तथा साहिसत्येमे(सलेमे)शासति क्षितिं ।
पत्तनाख्ये महदूर्णो (महादुर्गे) राजसल्ये च राजनि ॥ १४ ॥
युवराजे भोजराजे टीकेयं पूर्णतामगात् ।
कृता रामऋषिमिश्रेण वृद्धव्यासस्य सूनुना ॥ १५ ॥

इति श्रीवृद्धव्यसात्मज रामऋषिविरचितायां महाकाव्य नलोदय-टीकायां यमकबोधिन्यां नलराज्यप्राप्तिर्नाम चतुर्थः आश्वासः समाप्तः ४ श्रीरस्तु रसा ६ चला १ र्षि ७ मायुते विहाय नेतुमासिवै शुचौ सिते च पक्षके तिथौ हि पक्षतौ रवौ ॥ १ ॥

अखिलिछिवनाथ इदं हिदृशे नि पठाय च वै भवत्यु त्वरितां ।
वसुदेवसुतस्य परैधित यं किलल केशवशर्मसुतः सुमतिः युग्मं ॥
मंगलं लेखकानां च पाठकानां च मंगलं ।
मंगलं सर्वभूतानां भूयात् कृष्णप्रसादतः ॥
शर्मांतं ब्राह्मणस्योक्तौ वर्मांतं क्षत्रियस्य च ।
गुप्तांतं चैव वैश्यस्य पादांतं शूद्रजन्मनः

इति मनु । स्मृतिः मिति ज्येष्ट सुदि ६ रविवासरे संवत् १८५२ साके १७१७ इदं पुस्तकं लिप्पकृतं संपूर्णं १ श्रीराधाकृष्णाय नमः ॥

References.— 1 Aufrecht Catalogus Catalogorum, i, 280[a]; iii, 60[b].

All the Mss. of Ramarṣimiśra's commentaries referred to by Aufrecht are from this library only.

नलोदयकाव्य	Nalodayakāvya
with	with
यमकबोधिनी	Yamakabodhinī
No 311	336. / 1895-98.

Size.— $9\frac{4}{5}$ in. by $4\frac{1}{5}$ in.

Extent.— 47 leaves; 14–15 lines to a page; 36 letters to a line.

Description.— Country paper; old and brittle; Devanāgarī characters; hand-writing clear, legible and uniform; borders in black lines; red pigment occasionally used for verses and yellow for corrections.

The Ms. contains only 1–3 Āśvāsas.

Age.— The Ms. is old.

Author of the text.— Ravideva.

,, ,, ,, Comm.— Rāmarṣi.

Begins.—folio. 1[b]

Text हृदय सदा etc.....as in No. 305

Com श्रीगणेशाय नम ॥ प्रणम्य परमानंदं यदुनंदनमादितः ॥
नालोदयी मया टीका यथामति वितन्यते ॥ १ ॥ etc. .....
... ... as in No. 310

folio—16[a] इति रामऋषिविरचितायां यमकबोधिन्यां नलोदयटीकायां दमयंती-स्वयंवरो नाम प्र(थ)म आश्वासः ॥

folio—35[a] इति etc. ..... वसंतक्रीडावर्णनं नाम द्वितीय आश्वासः ॥

Ends.— folio. 47[b]

Text पदापदाप विभ्रमनयेन या पदा पदा ।
बनाबना वनाथवत् सजीवना वनाभवत् ॥ ५४ ॥

Com. सा दमयंती अनाथवत् अभवत् । यथा कश्चिदनाथस्तदा जातः सा काया आपदा हेतुभूतया विपत्या हेतुभूतया नावनौ आरण्यभूमौ पदाचरणेन परिभ्रमं आपत् प्राप्तवती । किं लक्षणायादभयवती । अभ्राणावा । अपदा अस्थाना वा । किं लक्षणा सा नयेन नीत्या उपलक्षिता । उपलक्षणे तृतीया । पुनः किं लक्षणा या । सजीवना वना । जीवना वनेन जीवनरक्षणेन सह वर्त्तमाना ॥ ७ ॥

इति रामऋषिश्चक्रे महाकाव्ये नलोदये ।
आश्वासस्य तृतीयस्य टीकां यमकबोधिनीं ॥ १ ॥

इति श्रीमद्रामऋषिविरचितायां यमकबोधिन्यां श्रीरविदेवविरचित महाकाव्य नलोदयटीकायां दमयंतीविलापो नाम तृतीय आश्वासः ॥ ३ ॥

श्री. श्री ॥

References.— See No. 305

नलोदयकाव्य with यमकबोधिनी

Nalodayakāvya with Yamakabodhinī

No. 312 — 310. / 1884-86.

Size.— 10 in. by $4\frac{1}{8}$ in.

Extent.— 30 leaves; 5 & 12 lines to a page; 28 & 36 letters to a line.

Description.— Country paper; old but well-preserved; Devanāgarī characters; hand-writing clear, legible and uniform; पृष्ठमात्राs used; this is a पञ्चपाठी Ms. having text in the middle with the comm. all around it; borders ruled in triple and double red lines.

Age.— Samvat 1774.

Author of the text.— Ravideva.

,, ,, ,, Comm.— Rāmarṣi.

Begins.—folio 1[b]

॥ ६७ ॥ श्रीअर्हद्भारतीभ्यां नमः ॥

Text हृदय सदा etc..... as in No. 305

Com. ॥ ६७ ॥ श्रीगणेशाय नमः ॥ ॐ नमः ॥

प्रणम्य परमानंदं यदुनंदनमादितः ।

नालोदयी मया टीका यथाविधि वितन्यते etc.... as in No. 310

folio 10[a] इति श्रीमद्रामऋषिविरचितायां यमकबोधन्यां रविदेवविरचित-महाकाव्य नलोदयटीकायां दमयंतीस्वयंवरो नाम प्रथम आश्वासः ॥ १ ॥

folio 18[b] इति etc. ..... वसंतक्रीडावर्णनो नाम द्वितीय आश्वासः ॥२॥

folio 25[a] इति etc. ..... दमयंतीविलापो नामस्तृतीयः आश्वासः ॥ ३ ॥

Ends.— folio 30[a]

Text अरिसंहतिरस्य etc..... as in No. 305

followed by इति श्रीरविदेवकविविरचिते नलोदययमककाव्ये महाकाव्ये चतुर्थ आश्वासः ॥ ४ ॥ श्रीरस्तु ॥ समाप्तो नलोदय ॥ संवत् १७७४ वर्षे लेखि ॥

Com. अयं नलः संपदं लक्ष्मीं etc. ..... up to प्राप्तवानित्यर्थः as in No. 310

followed by श्रीडिंडवाणनगरे etc. ..... up to वृद्धव्यासस्य सूनुना ४५ as in No. 310

followed by इति वृद्धव्यासात्मज मिश्ररामऋषिदाधीव्य विरचितायां रविदेवविरचितमहाकाव्यनलोदयटीकायां यमकबोधिन्यां नलराज्यप्राप्तिनाम चतुर्थः आश्वासः समाप्तः शुभराज्यस्तु ॥

References.— See No. 310

नलोदयटीका
called
यमकबोधिनी

Nalodayaṭīkā
called
Yamakabodhinī

No. 313

36.
1873-74.

Size.— 10 in. by $4\frac{1}{4}$ in.

Extent.— 46 leaves; 15 lines to a page; 42 letters to a line.

Description.— Country paper; old and discoloured; Devanāgarī characters; hand-writing clear, legible and uniform पृष्ठमात्राs used; borders ruled in two double black lines and edges in double; square spaces in the centre of folios with a few letters.

Age.— Saṁvat 1752.

Author.— Rāmarṣi.

Begins.— folio 1[b]

ॐ श्रीजिनाय नमः ॥

प्रणम्य परमानंदं यदुनंदनमादितः ।
नालोदयी मया टीका । यथामति वितन्यते ॥ १ ॥ etc. ...
as in No. 310

folio 14[b] इति श्रीमद्रामऋषिविरचितायां नलोदयव्याख्यायां यमकबोधिनीसमाख्यायां दमयंतीस्वयंवरो नाम प्रथम आश्वासः ॥ १ ॥ श्रीः ॥

folio 27[b] इति etc. ... ... वसंतक्रीडावर्णनो नाम द्वितीय आश्वासः ॥२

folio 37[a] इति etc. ... ... दमयंतीविलापो नाम तृतीय आश्वासः ॥३॥

Ends.—folio 46[a]

अयं नलः संपदं लक्ष्मीं etc. ... ... up to प्राप्तवानित्यर्थः as in No. 310

followed by इति श्रीमन्महाकविराविदेवविराचिते नलोदयाभिधे काव्ये चतुर्थ आश्वासः ॥ ४ ॥

श्रीडिंडवाणनगरे etc. ... ... up to वृद्धव्यासस्य सूनुना १५
as in No. 310

followed by इति श्रीमद्रामऋषिविरचितायां नलोदयव्याख्यायां यमकबोधिनीसमाख्यायां नलराज्यप्राप्तिर्नाम चतुर्थ आश्वासः ॥ ४ ॥

शराग्निमुनिभूयुक्ते वत्सरे दक्षिणायने ।
शुचौ मासे शुचौ पक्षे द्वादश्यां भृगुनंदने ॥१॥
जशवंते नृपाधीशे शासति क्षितिमंगलं ।
टीकेयं हरिदेवेन भूदेवेन लिपीकृता ॥ २ ॥

युग्मम् ॥ संवत् १७५२ वर्षे मिती आसूवदि ७ दिने लिपीचक्रं ॥

References.— See No. 310

नलोदय with टिप्पण	Nalodaya with Tippaṇa
No. 314	410. 1887-91.

Size.— $10\frac{2}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 19 leaves ; 7-8 lines to a page ; 34 letters to a line.

Description.— Country paper ; old and brittle ; Devanāgarī characters ; hand-writing of the text bold and of the ṭippaṇa very small ; borders ruled in double black lines ; red pigment used for verse-numbers and yellow for corrections.

Ṭippaṇi is written between the lines and in the margin. In the last colophon the text is ascribed to one केशवादित्य.

Age.— Saṁvat 1684.

Author.— Kālidāsa.

Begins.— folio. 1[b]

रामकृष्ण ।। हृदय सदा etc. ... ... as in No 305

folio 5[b] इति श्रीकालिदासकृतौ नलोदयमहाकाव्ये प्रथम सर्ग समप्तः ॥

folio 10[b] इति etc. ... ... द्वितीयः सर्ग्गः ॥ २ ॥

folio 15[a] इति etc. ... ... तृतीयः सर्ग्गः ॥

Ends. fol. 19[a]

अरिसंहतिरस्य etc. ... ... up to संपदं ॥
as in No. 305

followed by इति श्रीकेशवादित्यविरचिते ... महाकाव्ये चतुर्थो सर्ग्ग समाप्तः ॥ ४ ॥ संवत् १६८४ वर्षे माघसुदि प्रतिपदा रविदिने ॥ लिखितं केशवब्राह्मण सासनवलहरप्रधानमथुरायां बंगाली घाटेतिंदुकनाम-तीर्थे हरिकेशस्य स्थले स्वपाठार्थं वा परोपकाराय ॥ श्रीराम श्रीकृष्णो जयति शुभ भूयात् ॥

तैलात् रक्षं जलात् रक्षं । etc.

References.— See No. 305

नलोदयकाव्य
with
अवचूर्णि

Nalodayakāvya
with
Avacūrṇi

No. 315 — 712. / 1886-92.

Size.— $10\frac{2}{5}$ in. by $4\frac{2}{5}$ in.

Extent.— 9 leaves ; 11 lines to a page and 44 letters to a line (Text)
12-13 ,, ,, ,, ,, ,, 60 ,, ,, ,, ,, (Com.)

Description.— Smooth country paper ; very old but well-preserved ; Devanāgarī characters ; hand-writing of the comm. very small but clear, legible and uniform ; पृष्ठमात्राऽ used ; borders ruled in triple red lines ; this is a पञ्चपाठी Ms. ; square blank spaces in the middle of folios and also in the margins ; fol. 9 slightly moth-eaten.

Age.— Saṁvat 1494.

Author of the text.— Ravideva.
,, ,, ,, comm.— Not mentioned.

Begins.—folio. 1[a]

॥ ॥ ॐ नमो वीतरागाय

Text— हृदय सदा etc. ... ... as in No. 305

Com.— ॥ ६७ ॥ हे हृदय । सदा सर्वदा यादवतः श्रीमन्नारायणात् । मा गाः पृथग् मा भूः ॥ किं लक्षणात् यादवतः पापाटव्या । दवतः etc.

folio 3ᵃ इति नलोदये काव्ये प्रथमोल्लासः समाप्तः ॥

folio 5ᵇ इति नलोदय महाकाव्ये द्वितीयोल्लासावचूर्णिः समाप्ता ॥

folio 7ᵇ इति तृतीयोल्लासः

Ends.— folio. 9ᵇ

Text— अरिसंहतिरस्य etc. up to संपदं ॥ ४४ ॥ as in No. 305

